Visit Dwarkadheeshvastu.com For

FREE Vastu Consultancy, Music, Epics, Devotional Videos
Educational Books, Educational Videos, Wallpapers

****

All Music is also available in CD format. CD Cover can also be print with your Firm Name

****

We also provide this whole Music and Data in PENDRIVE and EXTERNAL HARD DISK.

Contact : Ankit Mishra (+91-8010381364, dwarkadheeshvastu@gmail.com)

॥ श्रीहरिः ॥

गौरी शंकर गुटिका

(नेपाली)

विषय-सूची

विषयः	पृष्ठे	विषय	पृष्ठे
गणेशस्मरणम्	१	रुद्रपाठः	४९
ब्राह्मणवरणम्	४	शम्भोरुत्तराङ्गपूजा	१००
पुण्याहवाचनम्	९	यजमानाभिषेकमन्त्राः	१०३
दीपपूजा	१३	प्रसादप्रदानमन्त्राः	१०८
कलशस्थापनम्	१४	सप्तशती	१११
गणेशपूजनम्	२०	सरस्वतीपूजनम्	१११
रक्षाबन्धनपूजा	२३	देव्याःकवचम्	११३
कलशस्कन्धप्रदेशीयदेवपूजा	२५	रात्रिसूक्तम्	१४०
प्रधानदेवता (शिव) पूजनम्	२६	सप्तशतीन्यासः	१४४
दक्षिणासंकल्पः	४३	सप्तशतीपाठः	१४९
रुद्रपाठन्यासः	४४	उत्तरन्यासः	२८९

विषयः	पृष्ठे	विषयः	पृष्ठे
देवीसूक्तम्	२९०	क्षमा-प्रार्थना	३२५
प्राधानिकरहस्यम्	२९७	सिद्धकुञ्जिकास्तोत्रम्	३२७
वैकृतिकरहस्यम्	३०२	सदाशिवस्तोत्रम्	३३०
मूर्तिरहस्यम्	३०८	ईश्वरस्तोत्रम्	३३३
कुमारीपूजनविधिः	३१२	बटुकभैरवस्तोत्रम्	३३६
कुमारीणांपूजनेवर्षव्यवस्था	३१४	मृत्युञ्जयस्तोत्रम्	३५२
कुमारीपूजने मूलवाक्यानि	३१६	महाकालभैरवस्तोत्रम्	३५८
पूजने वर्जनीयाः कन्याः	३१८	शीतलाष्टकम्	३७४
दुर्गास्तवः	३१९	नवग्रहस्तोत्रम्	३७७

—:❀:—

ॐ

शिवार्चनविधिः

❀ श्रीगणेशाय नमः ❀

त्रिराचम्य—केशवाय नमः, नारायणाय नमः, माधवाय नमः। हस्तप्रक्षालनम् गोविन्दाय नमः। ततः प्राणायामत्रयं कृत्वा—सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः। लम्बोदरश्च विकटो विघ्ननाशो गणाधिपः॥ धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः। द्वादशैतानि नामानि यः पठेच्छृणुयादपि॥ विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा। संग्रामे संकटे चैव विघ्नस्तस्य न जायते॥

शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥ सर्वमंगलमांगल्ये शिवे सर्वार्थसाधिके । शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥ सर्वदा सर्वकार्येषु नास्ति तेषाममंगलम् । येषां हृदिस्थो भगवान् मंगलायतनो हरिः ॥

तदेव लग्नं सुदिनं तदेव ताराबलं चंद्रबलं तदेव । विद्या-बलं दैवबलं तदेव लक्ष्मीपते तेऽङ्घ्रियुगं स्मरामि ॥ लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः । येषामिंदीवरश्यामो हृदयस्थो जनार्दनः । विनायकं गुरुं भानुं ब्रह्मविष्णुमहेश्वरान । सरस्वतीं

प्रणम्यादौ सर्वकार्यार्थसिद्धये ॥ अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरासुरैः ॥ सर्वविघ्नहरस्तस्मै गणाधिपतये नमः ॥—

ॐ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ॥ स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिर्व्यशेम हि देवहितं यदायुः ॥१॥ ॐ स्वस्ति नऽइन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ॥ स्वस्तिनस्तार्क्ष्यो ऽअरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥२॥ ॐ तन्मामवतु । तद्वक्तारमवतु । अवतुमाम् । अवतुवक्तारम् । अवतुवक्तारम् । ॐ शान्तिः शान्तिः शान्तिः ।

—:०:—

अथ ब्राह्मणवरणम् । यथोचितमुपपन्ना वरणसामग्रीं (जलभाजनोत्तरीयान्तरीयचन्दनाक्षतपुष्पादिकां) सम्पाद्य कुशादीन्यादाय ॥ हरिः ॐ ३ तत्सत् ३ विष्णुः ३ श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य सकलजगत्सृष्टिकारिणो ब्रह्मणो द्वितीयपरार्द्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे प्रथमचरणे भारतवर्षे भरतखण्डे जम्बूद्वीपे आर्यावर्तान्तर्गते हिमवद्दक्षिणपार्श्वे (अमुकनद्याः पुण्यभूमौ) अमुकक्षेत्रे विक्रमशाके बौद्धावतारे षष्टिसंव-

टि०-कोष्ठकान्तर्गतो भागः स्थानभेदे परिवर्तनीयः ।

त्सराणां मध्ये अमुकनाम्नि संवत्सरे अमुकायने अमुक ऋतौ अमुकमासे अमुकपक्षे अमुकवासरे अमुकतिथौ अमुकराशिस्थिते श्रीसूर्ये अमुकराशिस्थिते चन्द्रमसि अमुक राशिस्थिते देवगुरौ शेषेषु ग्रहेषु यथायथास्थानस्थितेषु सत्सु एवं ग्रहगणगुणविशेषेण विशिष्टायां शुभ पुण्यतिथौ मम स भार्यस्यसपुत्रस्यसकुटुम्बस्यायुरारोग्यैश्वर्योत्तरोत्तरहर्षविजयोदयपूवक दारिद्र्यदुःखदुर्भिक्षदौर्मनस्यदौर्भाग्योपसर्गमहामारीत्रासोल्कापा निर्घातभूकम्पादिसूचितदोषोपशान्त्यर्थं दुःस्वप्नसुस्वप्नतावाप्तिपूर्व-

कबालग्रहदशान्तर्दशागोचरदशादोषोपशान्त्यर्थं बाह्याभ्यन्तर-ज्वरातिसारापस्मारश्वासकाशादिसमस्तरोगाणां झटिति निवृत्ति-पूर्वकमारोग्यावाप्तये (श्रीसाम्बसदाशिवप्रीतये वा) दीपकलश-गणेशपूजनपूर्वकं श्रीसाम्बसदाशिवोपरि अविच्छिन्नजलधारया (दुग्धादिधारया वा) अभिषेकं कर्तुं यथासंख्याकावृत्तिकषडङ्ग-रुद्रपाठं च कर्तुम् तथा महाकाली-महालक्ष्मी-महासरस्वतीप्रसाद-सिद्धये मार्कण्डेयपुराणान्तर्गतसप्तशतीस्तोत्रस्य यथासंख्याका-वृत्तिकेवलपाठकर्म कर्तुं 'मार्कण्डेय उवाच इत्यारभ्य सावर्णिर्भविता मनुः' इतिपर्यन्तं प्रतिमन्त्रं शरणागतदीनार्तपरित्राणपरायणे। सर्व-

स्यार्तिहरे देवि नारायणि नमोऽस्तु ते ॥ इति मन्त्रेण (अन्येन वा रोगानशेषानित्यादिमन्त्रेण) यथासंख्याकावृत्तिकसम्पुटितपाठ-कर्मकर्तुं वा तथाऽस्मिन् कर्मणि परमेश्वरप्रीतिद्वारा सर्वाभ्युदया-वाप्तये पुण्याहवाचनं च कर्तुम् अमुकंगोत्रम् (अमुकगोत्रान् वा) ब्राह्मणम् (ब्राह्मणान् वा) एभिश्चन्दनपुष्पाक्षतादिभिरहं वृणे ॥ वृतोऽस्मि (वृताःस्मः वा) इति प्रतिवचनम् । यथाविहितं कर्म कुरु (कुरुत) । करवाणि (करवामः वा) इति प्रतिवचनम् ॥ ततः— अपसर्पन्तु ये भूता ये भूता भूमिमाश्रिताः ॥ ये भूता विघ्नकर्तारस्ते

१ ब्राह्मणबहुत्वे केचित्पुण्याहवाचनं कुर्वन्ति, युक्तं चैतत् ।

नश्यन्तु शिवाज्ञया। अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम् ॥ सर्वेषामविरोधेन शिवकर्म समारभे ॥ इति सर्षपाक्षतान् विकीर्य, आत्मरक्षां शिववन्दनेन कुर्यात् ॥ तत्र क्रमः—ईश्वराय नमः पूर्वे॥ आग्नेयेश्वराय नमः आग्नेये ॥ यमेश्वराय नमः दक्षिणे ॥ निर्ऋतीश्वराय नमः नैर्ऋत्ये ॥ वरुणेश्वराय नमः पश्चिमे ॥ वायव्येश्वराय नमः वायव्ये ॥ सोमेश्वराय नमः उदीच्याम् ॥ ईशानेश्वराय नमः ईशाने ॥ आकाशेश्वराय नमः ऊर्ध्वायाम् ॥ अनन्तेश्वराय नमः पृथिव्याम् ॥ सर्वेश्वराय नमः सर्वतः ॥ 'ॐ नमो भगवते रुद्राय' इति मन्त्रेण प्राणायामत्रयं कुर्यात्। तत्र पूरके ३६ ॥ कुम्भके १२ ॥ रेचके १२ ॥ मन्त्रसंख्या ॥

अथ पुण्याहवाचनम् ॥ पूर्वोक्तरीत्या कृतवरणान् चतुरः पञ्च वा ब्राह्मणान् प्रत्यङ्मुखान् कृत्वा प्राङ्मुखो यजमानः कृताञ्जलिः—[ॐ सत्सत् पूर्वसङ्कल्पसिद्धिरस्तु, अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणो मम—अभिष्टावाप्तये (करिष्यमाण रुद्राभिषेककर्मणि) भो ब्राह्मणाः !] पुण्याहं (१) भवन्तो ब्रुवन्तु (त्रिवारं यथोत्तरमुच्चैर्वदेत् । ब्राह्मणाश्च ॐ पुण्याहं ३ (त्रिवारं यथोत्तरमुच्चैः प्रतिवदेयुः) ततो ब्राह्मणः—ॐपुनन्तु मा देवजुनाः पुनन्तु मनसा धियं ÷ । पुनन्तु विश्वाभूतानि जातवेदः पुनीहि मा । इत्युच्चैः पठेयुः । ततो यजमानः (कोष्ठ-

कान्तगतं पूर्ववाक्यमुच्चार्य) स्वस्ति (२) भवन्तो ब्रुवन्तु ३ इति त्रिः, ब्राह्मणाश्च स्वस्ति ३ इति त्रिरुक्त्वा—ॐ स्वस्ति नऽइन्द्रो॑ वृद्धश्रवाः॑ स्वस्तिन॑ः पूषा॒ विश्ववे॑दाः॑। स्वस्ति नस्तार्क्ष्योऽअरिष्ट-नेमि॑ः स्वस्तिनो॒ बृहस्पतिर्दधातु । इति पठेयुः एवमग्रेऽपि यजमानः—ऋद्धिं (३) भवन्तो ब्रुवन्तु ३ इति त्रिः । ब्राह्मणाः ॐ ऋद्धिः ३ । ॐ सुत्रस्य॒ ऋद्धिरस्य गन्म॒ ज्योति॒रमृता॑ऽअभूम । दिव॑म्पृथि॒व्याऽ अध्यारु॑हामाविदाम दे॒वान्त्स्व॒र्ज्योति॑ः । यजमानः—वृद्धिं (४) भवन्तो ब्रुवन्तु ३ इति त्रिः । ब्राह्मणाश्च ॐ वृद्धिः ३ । ॐ ज्यैगु॒यञ्च॒ मु॒ऽआधिपत्यं च मे मन्यु॒श्च॑ मे॒भामं॑श्च

मे मथुमेम्मथश्च मे जेमा च मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्षिमा च मे द्राघिमा च मे वृद्धं च मे वृद्धिश्च मे यज्ञेन कल्पन्ताम् इति। यज०—कल्याणं (५) भवन्तो ब्रुवन्तु ३ इति त्रिः। ब्राह्म० ॐ कल्याणम् ३। ॐ यथेमां वाचं कल्याणी मावदानि जनेभ्यः। ब्रह्मराजन्याभ्याँशूद्राय चार्याय चस्वाय चारणाय च। प्रियो देवानां दक्षिणायै दातुरिह भूयासमयम्मे कामः समृद्ध्यतामुपमादो नमतु। यज०—शान्तिं (६) भवन्तो० ३ इति त्रिः। ब्राह्म० ॐ शान्तिः ३। ॐ द्यौःशान्तिरन्तरिक्षꣳ शान्तिः पृथिवीशान्तिरापः शान्तिरोषधयः

शान्तिः॥ वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्मशान्तिः सर्वꣳशान्तिः शान्तिरेव शान्तिः सामाशान्तिरेधि, इति। यज०—श्रियं (७) भवन्तो ३ इति त्रिः। ब्राह्म० ॐ श्रीः ३। ॐ मनसः काममाकूतिं वाचः सत्यमशीय। पशूनाꣳरूपमन्नस्य रसो यशः श्रीः श्रयताम्, इति पठित्वा—श्रीर्वचस्वमायुष्यमारोग्य मामिधात् पवमानं महीयते। धान्यं धनं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः। मन्त्रार्थाः सफलाः सन्तु पूर्णाः सन्तु मनोरथाः। शत्रूणां बुद्धिनाशोऽस्तु मित्राणामुदयोऽस्तु वः। अव्याधिना शरीरेण मनसा च निराधिना। पूरयन्नर्थिनामाशास्त्वं जीव

शतम् ॥ इति पठन्तः साक्षतदूर्वादलपूगीफलानि यजमाना-
र्पयेयुरिति । तत आचार्यः स्वयं वा दीपकलशगणेशादीनां
पूजां कुर्यात् । तत्प्रकारश्च यथा—

अथ दीपपूजा ॥ पृष्ठोदिवीति प्रज्वाल्य, ॐ पृष्ठोदिवीपृष्ठोऽ-
ग्निःपृथिव्यां पृष्ठोविश्वाऽओषधीरावि॑वेश । वै॒श्वा॒न॒रःसह॑सा
पृष्ठोऽअग्निः सनो दिवा सरिषस्पा॑तु नक्तम् ॥ नमोऽस्त्वनन्तायेति
पूजयेत् । नमोऽस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे।
सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः ॥ नम
इत्यादिना प्रणमेत् ॥ नमः कमलनाभाय नमस्ते जलशायिने ।

नमस्ते केशवानन्त वासुदेव नमोऽस्तु ते ॥ वासनाद्वासुदेवस्य वासितं भुवनत्रयम् । सर्वभूतनिवासोऽसि वासुदेव नमोऽस्तु ते ॥ शुभं भवतु कल्याणमारोग्यं सुखसम्पदः । मम शत्रुविनाशाय दीपज्योतिर्नमोऽस्तु ते ॥ इति दीपपूजा ॥

अथ कलशस्थापनम् ॥ ईशानदिग्भागेऽव्रणं सुशोभितं तैजसं मृण्मयं वा कलशं धान्योपरि स्थापयेत् ॥ तत्प्रकारश्च यथा— भूरसीति भूमिं संशोध्य ॐ भूरसिभूमिरस्यदितिरसिविश्वधाया विश्वस्यभुवनस्यधर्त्री ॥ पृथिवींयच्छपृथिवीन्दृꣳहपृथिवींमाहिꣳसीः ॥ धान्यमसीति धान्यं संस्थाप्य ॥ ॐ धान्यमसिधिनुहिदेवा

न्प्राणायत्वोदानायत्वाव्यानायंत्त्वा॥ दीर्घामनुप्रसितिमायुषेधान्दे-
वोवः सविताहिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेणपाणिनाचक्षुषेत्वा-
महीनांपयोसि ॥ आजिघ्रेति कलशं स्थापयेत् ॐ आजिघ्रकलशं-
मह्यात्वासिशन्त्विन्दवः॥पुनरूर्ज्जानिवर्तस्वसानः सहस्रं धुक्ष्वोरुधा
रापयस्वतीपुनर्माविशताद्रयिं ॥ इमम्मे इत्यादिना गङ्गेचेत्यादिना
च तीर्थजलं प्रक्षिपेत् ॥ ॐ इमम्मेवरुणश्रुधीहवमद्याचमृडय ॥
त्वामवस्युराचके ॥ गङ्गे च यमुने चैव गोदावरि सरस्वति ॥
नर्म्मदे सिन्धुकावेरि जलेऽस्मिन् सन्निधिं कुरु ॥ या ओषधीरिति
सर्वौषधीः प्रक्षिप्य ॥ ॐ याऽओषधीः पूर्वाजाताद्देवेभ्यस्त्रियुगम्पुरा

मनु॒ नु ब॒भ्रूणा॑म॒हꣳ श॒तं धामा॑नि स॒प्तच॑ ॥ हिरण्यगर्भ इति पञ्च-रत्नानि ॥ ॐ हि॒र॒य॒ग॒र्भः सम॑वर्त॒ताग्रे॑ भू॒तस्य॑ जा॒तः पति॒रेकऽ-आसीत् ॥ सदा॑धारपृथि॒वीं द्यामु॒तेमाङ्क॑स्मै दे॒वाय॑ ह॒विषा॑ विधेम ॥ या फलिनीरिति फलम् ॥ ॐ याः फ॒लिनी॒र्याऽअ॑फ॒लाऽअ॑पु॒ष्पा याश्च॑ पु॒ष्पिणीः॑ । बृह॒स्पति॑प्रसूता॒स्तानो॑मुञ्च॒न्त्वꣳ ह॑सः ॥ यवोसीति यवान् ॥ ॐ यवो॑सि य॒वया॒स्मद्द्वेषो॑ यवया रा॒तीर्दि॒वे त्वा॒न्तरि॑क्षाय त्वा पृथि॒व्यै त्वा॒ शुन्ध॑न्ताँल्लो॒काः पि॑तृ॒षद॑ना॒ः पितृषदनमसि ॥ गन्ध-द्वारामिति गन्धम् ॥ ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् । ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥ काण्डात्काण्डादिति

दूर्वाः ॥ ॐ काण्डात्काण्डात्प्ररोहन्तीपरुषः परुष्परि ॥ एवानो-
दूर्वेप्रतनुसहस्रेणशतेनच॥स्योनापृथिवीति सप्तमृदः ॥ ॐ स्योना-
पृथिविनोभवानृक्षरानिवेशनी ॥ यच्छानः शर्मसप्रथा ॥ अश्वत्थेव
इति पञ्चपल्लवैस्तन्मुखमाच्छाद्य ॥ ॐ अश्वत्थेवो निषदनं पणवो
वसतिष्कृता ॥ गोभाज इत्किलासथ यत्सनवथपूरुषम् ॥ बृहस्पते
इति वस्त्रयुग्मेन वेष्टयित्वा ॥ॐबृहस्पतेऽअतियदर्योऽअर्हाद्द्युमद्वि
भातिक्रतु मज्जनेषु॥ यद्दीदयच्छवसऽऋतप्र जातुतदस्मासुद्रविणं
धेहिचित्रम्॥ उपयामगृहीतोसिबृहस्पतयेत्वैष तेयोनि र्बृहस्पतयेत्वा॥
प्रजापतेनेति दक्ष्यक्षतैर्भूषयित्वा ॥ ॐ प्रजापतेनत्त्वदेतान्यन्यो-

ञ्चिश्वारूपाणिपरिताबभूव ॥ यत्कामास्तेजुहुमस्तन्नोऽअस्तुवयꣳ स्यामुपतयोरयीणाम् ॥ पूर्णादर्वीति कलशोपरिपूर्णपात्रं निधाय ॥ ॐ पूर्णादर्विपरापतसुपूर्णा पुनरापत ॥ वस्नेवविक्रीणावहाऽइषमूर्जꣳ शतक्रतो ॥ तत्र तत्वायामीति वरुणमावाह्य पञ्चोपचारै. पूजयेत् ॥ ॐतत्वायामिब्रह्मणावन्दमानस्तदाशास्तेयजमानोहविर्भिः ॥ अहेडमानोव्वरुणेहबोद्ध्युरशꣳ समानऽआयुः प्रमोषीः ॥ तत्रैव सर्वे समुद्रा इति तीर्थान्यावाहयेत् ॥ सर्वे समुद्राःसरितस्तीर्थानि जलदा नदाः । आयान्तु यजमानस्य दुरितक्षयकारकाः ॥ ततः कलशं स्पृष्ट्वाऽभिमन्त्रयेत् ॥ कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः ।

मूल त्वस्य स्थितो ब्रह्मा मध्ये मातृगणः स्मृतः ॥ कुक्षौ तु सागराः सप्त सप्तद्वीपा वसुन्धरा । ऋग्वेदोऽथ यजुर्वेदः सामवेदोऽप्यथर्वणः । अंगैश्च सहिताः सर्वे कलशं तु समाश्रिताः ॥ ततः कलशं प्रार्थयेत् ॥ देवदानवसंवादे मथ्यमाने महोदधौ । उत्पन्नोऽसि तदा कुम्भ विधृतो विष्णुना स्वयम् ॥ त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः । त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः ॥ शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः । आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः ॥ त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः । त्वत्प्रसादादिमं यज्ञं

कर्तुमीहे जलोद्भव ॥ सान्निध्यं कुरु देवेश प्रसन्नो भव सर्वदा ॥

अथ गणेशपूजनम् ॥ पूर्वसंकल्पमुच्चार्य, अमुकगोत्रस्यामुकशर्मणो ममामुककर्मणि निर्विघ्नपरिसमाप्तिपूर्वकस्वाभिलषितसिद्धये सिद्धिदातुः श्रीमन्महागणाधिपतेर्यथालब्धोपचारैर्यथाबुद्धिपूजनमहं करिष्ये ॥ अथावाहनम् ॥ ॐ गणानान्त्वा गणपतिꣳ हवामहे प्रियाणान्त्वा प्रियपतिꣳ हवामहे निधीनान्त्वा निधीपतिꣳ हवामहे व्वसोमम ॥ आहमजानि गर्भ्भधमात्वमजासिगर्भ्भधम्॥ॐभूर्भुवः स्वः सिद्धिबुद्धिसहित सांग सायुध सवाहन सपरिवार श्रीमन् महागणाधिपते ! इहागच्छ इह तिष्ठ यावत्पूजां करोमि तावत् त्वं

सुस्थिरो भव । इत्यावाह्य ॥ ॐ नमः सिद्धिबुद्धिसहिताय सांगाय सायुधाय सवाहनाय सपरिवाराय श्रीमते महागणाधिपतये—इदमासनम्, पाद्यम्, अर्घ्यम्, आचमनीयम्, स्नानीयम्, पुनराचमनीयम्, वस्त्रम्, यज्ञोपवीतम्, चन्दनम् अक्षतान्, पुष्पाणि, धूपम्, दीपम्, नैवेद्यम्, पूगीफलम्, ताम्बूलम्, फलम्, दक्षिणाम्, समर्पयामीति यथालाभमुपचारान्समर्प्य नारिकेलाद्यन्यतमंपात्रविन्यस्तफलं हस्ताभ्यामादाय—रक्ष रक्ष गणाध्यक्ष रक्ष त्रैलोक्यरक्षक ॥ भक्तानामभयंकर्ता त्राता भव भवार्णवात् ॥ द्वैमातुर कृपासिन्धो षाण्मातुर जगत्प्रभो ॥ वरदस्त्वं वरं देहि वाञ्छितं वाञ्छितार्थद ॥

अनेन फलदानेन सफलोऽस्तु सदा मम ॥ इति फलं समर्पयेत् ॥
ततः—सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः । लम्बोदरश्च विकटो विघ्ननाशो गणाधिपः ॥ धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः । द्वादशैतानि नामानि यः पठेच्छृणुयादपि ॥ विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा ॥ सङ्ग्रामे सङ्कटे चैव विघ्नस्तस्य न जायते॥ वक्रतुण्ड महाकाय कोटिसूर्यसमप्रभ ॥ निर्विघ्नं कुरु मे देव प्रसन्नो भव सर्वदा ॥ स्वपादपद्मप्रणतभक्तकल्याणकारिणे । विघ्नवल्लीकुठाराय गणाधिपतये नमः ॥ इति प्रार्थयेत् ।

अथ रक्षाबन्धनपूजा ॥ यवदूर्वासर्षपचन्दनगोमयदधिसहितं रक्षासूत्रं ताम्रपात्रे धृत्वा पात्रं स्पृशन् नारायणकवचं पठेत् । यथा— ॐ पूर्वे रक्षतु गोविन्द आग्नेय्यां धरणीधरः । याम्यां रक्षतु वाराहो नारसिंहस्तु नैर्ऋते । वारुण्यां केशवो रक्षेद्वायव्यां मधुसूदनः । उत्तरे श्रीधरो रक्षेदैशान्यां तु गदाधरः । ऊर्ध्वं गोवर्धनो रक्षेदधस्तात्तु महीधरः । एवं दशदिशो रक्षेद्वासुदेवो जनार्दनः ॥ ततः पञ्चोपचारैः पूजयेत् तत्र मन्त्राः—ॐ न त॒द्रक्षा॑ꣳसि॒ न पि॑शा॒चा स्त॑रन्ति दे॒वाना॒मोज॑ः प्रथम॒जꣳ ह्ये॒तत् । यो बि॒भर्त्ति॑ दाक्षाय॒णꣳ हिर॑ण्य॒ꣳ स दे॒वेषु॑ कृणुते दी॒र्घमा॒युः स म॑नु॒ष्ये॒षु कृणुते दी॒र्घमायुः

॥१॥ यदाबध्नन्दाक्षायणाहिरण्यꣳ शतानीकायसुमनस्यमानाः ।
तन्न्मऽआबध्नामि शतशारदायायुष्माञ्जरदष्टिर्यथासम् ॥२॥ रक्षो
हणंबलगहनं वैष्णवीमिदमहन्तंबलगमुत्किराम्ययम्मे निष्ठ्यो यमुमा-
त्योनिचखानेदमहन्तंबलगमुत्किराम्ययम्मेसमानोयमसमानोनिच
खानेदमहन्तंबलगमुत्किराम्ययम्मेसबन्धुर्यमसबन्धुर्निचखानेदमहन्तं
बलगमुत्किराम्ययम्मेसजातोयमसजातोनिचखानोत्कृत्याङ्किराम्यरा
स्वराडसिसपत्नहासत्नराडस्यमित्रहाजनराडसिरक्षोहासंवराडस्य-
मित्रहा॥४॥रक्षोहणोवोबलगहनꣳ प्रोक्षामिवैष्णवानंक्षोहणा-
वोबलगहनोवनयामिवैष्णवात्रक्षोहणोवोबलगहनावस्तृणामिवै-

ष्णवान्रक्षोहणौवांबलगहनाऽउपदधामिव्वैष्णवीरक्षोहणौवांबलगहनौपर्यूहामिव्वैष्णवीवैष्णवमसि वैष्णवात्स्थ॥५॥ त्वंयविष्ठदाशुषोनॄँःपाहिशृणुधीगिरः। रक्षातोकमुतत्त्मना॥६॥सप्तऽऋषयः प्रतिहिताः शरीरेसप्तरक्षन्तिसदमप्रमादम्। सप्तापःस्वपतोलोकमीयुस्तत्र जागृतोऽअस्वप्नजौसत्रसदौचदेवौ ॥७॥ इति ॥ ततः—

कलशस्कन्धप्रदेशे—गणपत्यादिपञ्चायतनान्, सूर्यादिनवग्रहान्, विनायकादिपञ्चलोकपालान्, ईश्वराद्यधिदेवान्, अग्न्यादिप्रत्यधिदेवान्, इन्द्रादिदशदिक्पालान्, ध्रुवाद्यष्टवसून्, धात्रादिद्वादशादित्यान्, वीरभद्राद्येकादशरुद्रान्, गौर्यादिषोडशमातॄः,

आवहादिसप्तमरुतः,विनायक-ब्रह्मविष्णु-रुद्रार्क-वनस्पतीन्,आवाह्य नाममन्त्रेणयथासम्पादितपाद्यादिधूपदीपनैवेद्यान्तैरुपचारैःपूजयेत्। ततः प्रार्थयेत् । सूर्यः शौर्यमथेन्दुरिन्द्रपदवीं सन्मङ्गलं मङ्गलः सद्बुद्धिंच बुधो गुरुश्च गुरुतां शुक्रः सुखं शं शनिः । राहुर्बाहुबलं करोतु सततं केतुः कुलस्योन्नतिं ॥ नित्यं प्रीतिकरा भवन्तु मम ते सर्वेऽनुकूला ग्रहाः ॥ इति ॥

ततः प्रधानदेवतां (साम्बसदा–शिवं) पूजयेत् । तत्प्रकारश्च यथा—आदौ ध्यानम् ॥ ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं रत्नाकल्पोज्ज्वलाङ्ग परशुमृगवराभीतिहस्तं

प्रसन्नम् ॥ पद्मासीनं समन्तात् स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं विश्वाद्यं विश्ववन्द्यं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम् ॥ (आवाहनम्—*एह्येहि गौरीश पिनाकपाणे शशाङ्कमौले वृषभाधिरूढ ॥ देवाधिदेवेश महेश नित्यं गृहाण पूजां भगवन् नमस्ते ॥ ॐ नमस्तेरुद्रमन्यव ऽ उतोतऽइषवे नमः ॥ बाहुभ्यां मुतते नमः ॥ १ ॥

आसनम्—रम्यं सुशोभनं दिव्यं सर्वसौख्यकरं शुभम् ॥ आसनं च मया दत्तं गृहाण परमेश्वर ॥ ॐ यातेरुद्र शिवातु-

* इदमावाहनं बाणलिङ्गेऽन्यत्रापि, स्थिरलिङ्गे न कर्तव्यम् ।

नूर घोरापा पकाशिनी ॥ तयानस्तुन्वा शन्तमया गिरि शन्ता मिचाकि शीहि ॥ २ ॥

पाद्यम्—उष्णोदकं निर्मलञ्च सर्वसौगन्ध्यसंयुतम् ॥ पादप्रक्षालनार्थाय दत्त ते प्रतिगृह्यताम् ॥ ॐ यामिषु ङ्गिरिशन्तु हस्तें विभुर्य्यस्तवे ॥ शिवाङ्गिरित्रुताङ्कुरुमाहिꣳ सीꣳपुरुषञ्जगत् ॥ ३ ॥

अर्घ्यम्—अर्घ्यं गृहाण देवेश गन्धपुष्पाक्षतैर्युतम् ॥ करुणाकर देवेश प्रसन्नो भव शंकर ॥ ॐ शिवेनवचसा त्वा गिरिशाच्छावदामसि ॥ यथानुꣳ सर्व्वं मिज्जगद युक्षम ६ सुमनाऽ असत ॥ ४ ॥

आचमनीयम्—सर्वतीर्थसमायुक्तं सुगन्धि विमलं जलम्॥ आचम्यतां मया दत्तं चन्द्रशेखर शंकर ॥ ॐ अध्यवोच-दधिवक्ता प्रथमो दैव्यो भिषक् ॥ अहींश्च सर्व्वाञ्जम्भय-न्त्सर्वाश्च यातुधान्यो धराचीः पर सुव ॥ ५ ॥

स्नानीयम्—गङ्गासरस्वतीरेवापयोष्णीनर्मदाजलैः ॥ स्नापितो-ऽसि मया देव ततः शान्तिं कुरुष्व मे ॥ ॐ असौ यस्ताम्रो ऽ अरुण ऽ उत बभ्रुः सुमङ्गलः ॥ येचैनꣳ रुद्राअभितो दिक्षु श्रिताः सहस्रशोवैषा ꣳ हेडऽईमहे ॥ ६ ॥

पञ्चामृतस्नानम्—तत्रादौ पयसा—कामधेनुसमुद्भूतं सर्वेषां जीवनं

परम् ॥ पावनं यज्ञहेतुश्च पयः स्नानार्थमर्पितम् ॥ ॐ पय÷पृथि-व्याम्पय ओषधीषुपयोदिव्यन्तरिक्षेपयोधाः ॥ पयस्वतीः÷प्रदिशः÷सन्तुमह्यम् ॥ शुद्धोदकस्नानम्—ॐ आपोऽअस्मान्मातर÷शुन्धयन्तु घृतेननोघृतप्व÷पुनन्तु॥ विश्वꣳहिरिप्रम्प्रवहन्तिदेवी-रुदिदाभ्यꣳशुचिरापूतऽएमि ॥ १ ॥

दध्ना—पयसस्तु समुद्भूतं मधुराम्लं शशिप्रभम् ॥ दध्यर्पितं मया देव स्नानाय प्रतिगृह्यताम् ॥ ॐ दधिक्राव्णोऽअकारिष-ञ्जिष्णोरश्वस्यव्वाजिनः÷ सुरभिनो ॥ मुखकरत्प्रणऽआयूꣳषितारिषत् ॥ शुद्धोदकस्नानम्—ॐ आपोऽअस्मान्मातर÷

शुन्धयन्तु घृतेननो घृतप्व ÷ पुनन्तु ॥ व्विश्वꣳहिरिप्रम्प्रवहन्ति देवी रुदिदाभ्यꣳ शुचिरा पूतऽएमि ॥ २ ॥

घृतेन—नवनीतसमुत्पन्नं सर्वसन्तोषकारकम् ॥ घृतं तुभ्यं ददाम्येतत् स्नानाय प्रतिगृह्यताम् ॥ ओं घृतम्मिमिक्षेघृतमस्य योनिंघृतेश्रितोघृतम्वस्य्धाम ॥ अनुष्वधमावहमादयस्वस्वाहाकृतंवृषभव्वक्षिहव्यम् ॥ शुद्धोदकस्नानम्—ओं आपोऽअस्मान्मातर÷ शुन्धयन्तु घृतेननो घृतप्व÷ पुनन्तु ॥ व्विश्वꣳहिरिप्रम्प्रवहन्तिदेवी रुदिदाभ्यꣳ शुचिरा पूताऽएमि ॥३॥

मधुना—तरुपुष्पसमुद्भूतं सुस्वादुमधुरं मधु ॥ तेजः पुष्टिकरं

दिव्यं स्नानार्थं प्रतिगृह्यताम् ॥ ओं मधुव्वाताऽ ऋतायते मधुक्षरन्तिसिन्धवः ॥ माध्वीर्न्नः सन्त्वोषधीः ॥ मधुनक्तमुतोषसोमधुमत्पार्थिवꣳ रजः ॥ मधुद्यौरस्तुनः पिता ॥ मधुमान्नोव्वनस्पतिमधुमाँऽ२ अस्तुसूर्य्यः ॥ माध्वीर्गावोभवन्तुनः ॥ शुद्धोदकस्नानम्—ॐ आपोऽअस्मान् मातरः शुन्धयन्तु घृतेननो घृतप्वः पुनन्तु ॥ विश्वꣳ हिरिप्रम्प्रवहन्ति देवी रुदिद्दाऽभ्यः शुचिरा पूतऽ एमि ॥ ४ ॥

शर्करया—इक्षुसारसमुद्भूता शर्करा पुष्टिकारिका ॥ मलापहारिणी दिव्या स्नानाय प्रतिगृह्यताम् ॥ ॐ अपाꣳरसमुद्वयसꣳ

सूर्ये सन्तꣳ समाहितम् । अपाꣳ रसस्य योरसस्तम्वोगृह्णाम्युत्त-
ममुपयामगृहीतोसीन्द्रायत्वाजुष्टंगृह्णाम्येष ते योनिरिन्द्रायत्वा
जुष्टतमम् ॥ शुद्धोदकस्नानम्—ॐ आपोऽअस्मान्मातरꣳशुन्धयन्तु
घृतेनना घृतप्वꣳपुनन्तु ॥ विश्वꣳहिरिप्रम्प्र वहन्ति देवीरुदि
दाभ्यꣳशुचिरापूतऽएमि ॥ ५ ॥

गन्धोदकस्नानम्—मलयाचलसम्भूतचन्दनागरुवासितम् ।
सलिलं देवदेवेश स्नानार्थं प्रतिगृह्यताम् ॥

ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वयेश्रियम् ॥

नानासुगन्धिद्रव्यं च चन्दनं रजनीयुतम् ।
उद्वर्तनं मया दत्तं गृहाण शशिशेखर ॥

ॐ अ॒ꣳ शुना॑तेऽअ॒ꣳशुः पृ॑च्यता॒म्परु॑षा॒परु॑ः ग॒न्धस्ते॒सोम॑मवतु॒मदा॑य॒रसो॒ऽअच्यु॑तः ॥

पुनः शुद्धोदकस्नानम् । ॐ आपो॑ऽअ॒स्मान्मा॒तरः॑ शुन्धयन्तु घृ॒तेन॑नोघृत॒प्प्व॒ः पुनन्तु ॥ व्विश्श्व॒ꣳहिरि॒प्प्रम्प्र॒वह॑न्ति दे॒वी रु॒दिदा॑ब्भ्य॒ः शुचि॒रा पू॒तऽए॑मि ॥ ६ ॥

ततः 'ॐ साम्बसदाशिवाय नमः' इति नाममन्त्रेण गन्धाक्षतबिल्वपत्रधूपदीपनैवेद्यानि समर्प्य, 'ॐ गणानान्त्वा' इत्यादि-

भिर्मन्त्रैः संकल्पितावृत्तिभिरभिषेकं विधाय*

वस्त्रं समर्पयेत्—सर्वभूषाधिके सौम्ये लोकलज्जानिवारणे ॥
मयोपपादिते तुभ्यं वाससी प्रतिगृह्यताम् ॥

ॐ असौ योवसर्पति नीलग्रीवो विलोहितः ॥ उतैनाङ्गो-पाऽअदृश्रन्नदृश्रन्नुदहार्य्यः सदृष्टो मृडयातिनः ॥ ७ ॥

यज्ञोपवीतम्—नवभिस्तन्तुभिर्युक्तं त्रिगुणं देवतामयम् ॥
उपवीतं चोत्तरीयं गृहाण परमेश्वर ॥

ॐ नमोऽस्तु नीलग्रीवाय सहस्राक्षायमीढुषे । अथो येऽअस्य-सत्त्वानोहन्तेभ्यो करन्नमः ॥ ८ ॥

* अतः परमुत्तराङ्गपूजाऽवधेया ।

चन्दनम्—श्रीखण्डं चन्दनं दिव्यं गन्धाढ्यं सुमनोहरम् ॥
विलेपनं सुरश्रेष्ठ चन्दनं प्रतिगृह्यताम् ॥

ॐ प्रमु॑ञ्च॒ धन्व॑न॒स्त्वमु॑भयो॒रात्न्यो॒र्ज्ज्याम् ॥ याश्च॑ ते॒ हस्त॒ऽइष॑व॒ꣳपरा॒ताभ॑गवो व्वप ॥ ९

अक्षतान्—अक्षताँश्च सुरश्रेष्ठ कुंकुमाक्तान् सुशोभनान् ॥
मया निवेदितान् भक्त्या गृहाण परमेश्वर ॥

ॐ अक्ष॒न्नमी॑मदन्त॒ ह्यव॑प्प्रि॒याऽअ॑धूषत ॥ अस्तो॑षत॒ स्वभा॑नवो॒ व्विप्प्रा॒नवि॑ष्ठया म॒तीयोजा॒न्वि॒न्द्रते॒ हरी॑ ॥

पुष्पाणि—माल्यादीनि सुगन्धीनि मालत्यादीनि वै प्रभो ॥

मयाऽनीतानि पुष्पाणि पूजार्थं प्रतिगृह्यताम् ।

ॐ विज्ज्यन्धनु॑ः कप॒र्द्दिनो॒ व्विशल्ल्यो॒बाण॑वाँऽउ॒त अने॑शन्नस्य॒ याऽइ॑षवऽआ॒भुरस्य निषङ्गधिः ॥ १० ॥

बिल्वपत्राणि—त्रिदलं त्रिगुणाकार त्रिनेत्रं च त्रिधायुधम् ॥

त्रिजन्मपापसंहारमेकबिल्व शिवार्पणम् ॥

ॐ शि॒वो भ॑वप्प्र॒जाब्भ्यो॒मानुषीभ्य॒स्त्वमङ्गिरः ॥ माद्यावा॑पृथि॒वीऽअ॒भिशो॑ची॒र्म्मान्तरि॑क्षं॒ माव्वन॒स्पती॑न् ॥

धूपम्—वनस्पतिरसोद्भूतो गन्धाढ्यो गन्ध उत्तमः ॥

आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥

ॐ यातेहेतिर्म्मीदुष्टमहस्तेँ बभूवतेधनुः ॥ तया स्मान्विश्वतस्त्व मयक्ष्मया परिभुज ॥ ११ ॥

दीपम्—आज्यं च वर्तिसंयुक्तं वह्निना योजितं मया ॥
दीपं गृहाण देवेश त्रैलोक्यतिमिरापहम् ॥

ॐ परिते धन्वनोहेतिरस्मान्न्वृणक्तु बिश्वतः ॥ अथोऽइषु धिस्तवारे ऽअस्मन्निधे हितम् ॥ १२ ॥

नैवेद्यम्—शर्कराघृतसंयुक्तं मधुरं स्वादु चोत्तमम् ॥
उपाहारं समानीतं नैवेद्यं प्रतिगृह्यताम् ॥

ॐ अवतत्य धनुष्ट्वꣳसहस्राक्षशतेषुधे ॥ निशीर्य्य शल्यान-

नाम्मुखौ शिवोनः सुमनाभव ॥ १३ ॥

आचमनीयम्—एलोशीरलवङ्गादिकर्पूरादिसुवासितम् ॥
प्राशनायाऽऽहृतं तोयं गृहाण परमेश्वर ॥

ताम्बूलम्—पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम् ॥
एलाचूर्णादिसंयुक्तं ताम्बूलं प्रतिगृह्यताम् ॥

ॐ नमस्तऽआयुधायानातताय धृष्णवे उभाभ्यां मुतते नमो बाहुभ्यान्तवधन्वने ॥ १४ ॥

दक्षिणाम्—हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ॥
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥

ॐ हिरण्यगर्भः समवर्तताग्रेभतस्यजातः पतिरेकऽआसीत् ।
सदाधारपृथिवीन्द्यामुतेमाङ्कस्मैदेवायहविषाविधेम ॥ १५ ॥

कर्पूरातिक्यम्—कदलीगर्भसम्भूतं घनसारं मनोहरम् ॥
आरातिक्यमहं कुर्वे पश्य मे वरदो भव ॥

ॐ इदꣳ हविः प्रजननम्मे ऽअस्तुदशवीरꣳ सर्व्वंगणꣳ
स्वस्तयें ॥ आत्मसनिंप्रजासनिपशुसनिंलोकसन्यभयसनिं ॥ अग्निः
प्रजाम्बहुलाम्मेँ करोत्वन्नुम्पयोरेतोऽअस्मासुधत्त ॥ १६ ॥

प्रदक्षिणाम्—यानि कानि च पापानि जन्मान्तरकृतानि च ॥
तानि सर्वाणि नश्यन्तु प्रदक्षिणपदे पदे ॥

ॐ मानोमहान्तमुतमानोऽअर्भ्भकम्मानऽउक्षन्तमुतमानऽ-
उक्षितम् ॥ मानोव्वधीः पितरम्मोतमातरम्मानः प्रियास्तन्वोरुद्र-
रीरिषः ॥ इत्युपचारान्समर्प्य, पुष्पाण्यादाय बद्धाञ्जलिः प्रार्थयेत्—

नाना सुगन्धिपुष्पाणि देशकालोद्भवानि च ।
पुष्पाञ्जलिं मया दत्तं गृहाण परमेश्वर ॥

ॐ मानस्तोकेतनये मानऽआयुषिमानोगोषुमानोऽअश्वषुरी-
रिषः॥मानोव्वीरान्रुद्रभामिनोव्वधीर्हविष्मन्तःसदमित्त्वाहवामहे

ततः—आवाहनं न जानामि न जानामि विसर्जनम् ।
पूजां चैव न जानामि प्रसीद परमेश्वर ॥

विधिच्युतं भक्तिहीनमुपचारविवर्जितम् ।
यत्पूजितोऽसि भगवँस्तेनापोश प्रसीदसि ॥
ग्रहपीडाः प्रशाम्यन्तु भूतबाधा विनश्यतु ।
ज्वरादयोऽखिलारोगाः विनश्यन्तु त्वदिच्छया ॥
शिवशंकर विश्वात्मन् भूतेश्वर दयामय ।
भवत्स्मरणमात्रेण रक्ष नः पक्षवर्जितान् ॥
कर्पूरगौरं करुणावतारं संसारसारं भुजगेन्द्रहारम् ।
सदा वसन्तं हृदयारविन्दे भवं भवानीसहितं नमामि ॥
करचरणकृतं वाक्कायजं कर्मजं वा ।
श्रवणनयनजं वा मानसं वाऽपराधम् ॥

विदितमविदितं वा सर्वमेव क्षमस्व ।

जय जय करुणाब्धे श्रीमहादेव शम्भो ॥

इति क्षमापयेत् ततः कृतस्य रुद्राभिषेकादिकर्म्मणः साङ्गतायै भूयसीं दक्षिणां दद्यात् ॥ तत्र वाक्यम्—ओंअद्येत्यादि० मम श्रीसाम्बसदाशिवप्रीतिद्वारा नानाविधव्याधिप्रशमनपूर्वकनिरुपद्रवायुष्यतावाप्तये (यथासंख्याकावृत्त्या) कृतस्य रुद्राभिषेककर्मणः साङ्गतायै इमां दक्षिणां (यथानामदैवतां) रुद्राध्याय (सप्तशती) पाठकर्तृभ्यो नानानामगोत्रेभ्यो ब्राह्मणेभ्यो यथाभागं विभज्य युष्मभ्यमहं सम्प्रददे ॥ ॐ तत्सत् मम ॥ इतिशुभम् ॥

रुद्रपाठन्यासः

श्रीगणेशाय नमः ।। अथ कर्ता यजमानः (ब्राह्मणो वा) आचम्यप्राणनायम्य षडङ्गन्यासान् कुर्यात् ।। तत्र क्रमः ।। अद्यपूर्वोच्चारित एवं गुणविशेषेणविशिष्टायां शुभपुण्यतिथौ मम आत्मनः (यजमानस्य वा) सकलशास्त्रश्रुतिस्मृतिपुराणोक्तफल-प्राप्त्यर्थम्, धर्मार्थिकाममोक्षफलसिद्ध्यर्थं सर्वव्याधिनिवारणार्थं सर्वाभीष्टसिद्ध्यर्थं अमुककामनासिध्यर्थम् वा अमुकद्रव्येण जलधारया वा श्रीभवानीशङ्करदेवताप्रीत्यर्थम्, अमुकरुद्रा-

भिषेकमहं करिष्ये ।। तदङ्गतया विहितान् शरीरशुद्धयर्थम् लघु-
रुद्रन्यासांश्च करिष्ये ।।

मनोजूतिरिति मन्त्रस्य बृहस्पतिर्ऋषिः बृहस्पतिर्देवता
बृहतीछन्दः हृदयन्यासे जपे विनियोगः ।।

ॐ मनोजूतिर्ज्जुषतामाज्ज्यस्यबृहस्पतिं यज्ञमिमन्तनोत्वरि-
ष्टंयज्ञंसमिमन्दधातु ।। विश्वेदेवासऽइहमादयन्तामो३
म्प्रतिष्ठ ।। ॐ हृदयाय नमः ।। १ ।।

अवोध्यग्निरिति मन्त्रस्य बुधगविष्ठिरऽऋषिः अग्निर्देवता-
त्रिष्टुप्छन्दः शिरोन्यासे जपे विनियोगः ।।

ॐ अवोद्युग्निः समिधाजनानाम्प्रतिधेनुमिवायतीमुषासम् ॥ बृहाऽइव प्रयामुज्जिहानाः प्रभानवः सिस्रते नाकमच्छ ॥ ॐ शिरसे स्वाहा ॥ २ ॥

मूर्द्धानमिति मन्त्रस्य भरद्वाज ऋषिः अग्निर्देवता त्रिष्टुप्छन्दः शिखान्यासे जपे विनियोगः ॥

ॐ मूर्द्धानन्दिवोऽअरतिम्पृथिव्याऽवैश्वानरमृतऽआजातमग्निम् ॥ कविꣳसम्राजमतिथिञ्जनानामासन्नापात्रञ्जनयन्तदेवाः । ॐ शिखायै वषट् ॥ ३ ॥

मर्माणित इति मन्त्रस्य अप्रतिरथ ऋषिः मर्माणि देवता विराट् छन्दः कवचन्यासे जपे विनियोगः ॥

ॐ मर्म्माणितेवर्म्मणाच्छादयामिसोमस्त्वाराजामृतेनानु-
वस्ताम् ॥ उरोर्व्वरीयोव्वरुणस्तेकृणोतु जयन्तुन्त्वानुदे वामदन्तु ॥
ॐ कवचाय हुम् ॥ ४ ॥

विश्वतश्चक्षुरिति मन्त्रस्य विश्वकर्मा भौवन ऋषिः विश्वकर्मा
देवता त्रिष्टुप्छन्दः नेत्रन्यासे जपे विनियोगः ॥

ॐ विश्वतश्चक्षुरुतव्विश्वतो मुखोविश्वतोबाहुरुतव्विश्वत
स्पात् ॥ सम्बाहुभ्यान्धमतिसम्पतत्त्रै र्द्यावाभूमी जनयन्देव-
एक÷ ॥ ॐ नेत्रत्रयाय वौषट् ॥ ५ ॥

मानस्तोक इति मन्त्रस्य परमेष्ठी ऋषिः एक रुद्रो देवता

जगतीछन्दः अस्त्रन्यासे जपे विनियोगः ।।

ॐ मानस्तोकेतनये मानऽआयुषिमानोगोषु मानोऽअश्वे-
षुरीरिषः ।। मानोव्वीरान्त्रुद्रंभामिनोव्वधीर्हविष्मन्तःसद-
मित्वाहवामहे ।। ॐ अस्त्राय फट् ।। ६ ।।

ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारु चन्द्रावतंसं
रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम् ।
पद्मासीनं समन्तात् स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं
विश्वाद्यं विश्ववन्द्यं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम् ।।

ॐ नमः पार्वतीपतये हर !

श्रीगणेशाय नमः ॥ हरिः ॐ गणानांन्त्वागणपंतिꣳहवा-
महेप्प्रियाणांन्त्वाप्प्रियपतिꣳहवामहेनिधीनान्त्वांनिधिपतिꣳहवामहे
व्वसोमम ॥ आहमंजानिगर्भ्भं धमात्त्वमंजासिगर्भ्भं धम् ॥१॥
गायत्रीत्रिष्टुप्जगंत्यनुष्टुप्पङक्त्यासह॥बृहत्युष्णिहांकुकुप्सूचीभिं
÷शम्म्यन्तुत्वा ॥२॥द्विपंदा श्चतुंष्पदास्त्रिपंदा श्चपट्पंदाꣳ ॥
व्विच्छंन्दा वाश्चसच्छन्दाꣳसूचीभिं÷शम्म्यन्तुत्वा ॥३॥ सहस्तो-
माꣳसह छन्दसऽआवृत÷ सहप्प्रंमाऽऋषयꣳसप्तदैव्यां÷॥ पूर्वे-
षाम्पन्थांमनुदृश्यधीराऽअन्वालेभिरेरत्थ्योनरश्मीन् ॥ ४ ॥
यऽआग्रंतोदूरमुदैतिदैवन्तदुसप्तस्यतथै वैतिं॥दूरङ्गमञ्ज्योतिषाञ्ज्यो

तिरेकन्तन्मे मनः शिवसङ्कल्पमस्तु ॥ ५ ॥ येन कर्म्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः । यदपूर्वं यक्षमन्तः प्रजानान्तन्मे मनः शिवसङ्कल्पमस्तु ॥६॥ यच्चप्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतम्प्रजासु ॥ यस्मान्नऽऋते किञ्चन कर्म्म क्रियते तन्मे मनः शिवसङ्कल्पमस्तु ॥७॥ येनेदम्भूतम्भुवनम्भविष्यत्परिगृहीतममृतेन सर्व्वम् ॥ येन यज्ञस्तायते सप्तहोतातन्मे मनः शिवसङ्कल्पमस्तु ॥ ८ ॥ यस्मिन्नृचः साम यजूꣳषि यस्मिन्प्रतिष्ठितारथनाभावि वाराः ॥ यस्मिँश्चित्तꣳसर्व्वमोतम्प्रजानान्तन्मे मनः शिवसङ्कल्पमस्तु ॥९॥ सुषारथिरश्वानिव यन्मनुष्यान्ने

नीयतेभीशुभिर्व्वाजिनऽइव ॥ हृत्प्रतिष्ठं यदजिरञ्जविष्ठन्तन्मेमनः-
शिवसंङ्कल्पमस्तु ॥ १० ॥ इतिश्रीरुद्रे प्रथमोऽध्यायः ॥ ॥

हरिः ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् । सभूमिꣳसर्व्वतस्पृ-
त्वात्यतिष्ठद्दशाङ्गुलम् ॥ १ ॥ पुरुषएवेदꣳसर्व्वं यद्भूतं यच्च भाव्यम् ॥
उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥ २ ॥ एतावानस्यमहिमा-
तोज्ज्यायाँश्चपूरुषः ॥ पादोस्यविश्वाभूतानित्रिपादस्यामृतन्दि
वि ॥ ३ ॥ त्रिपादूर्ध्वऽउदैत्पुरुषःपादोस्येहाभवत्पुनः ॥ ततो
विष्वङ्व्यक्रामत्साशनानशनेऽअभि ॥ ४ ॥ ततोविराडजायत-
विराजोऽअधिपूरुषः ॥ सजातोऽअत्यरिच्यतपश्चाद्भूमिमथोपुरः

॥५॥ तस्माद्यज्ञात्सर्व्व हुतः सम्भृतम्पृषदाज्यम् ॥ पशूँस्ताँश्चक्रे-
व्वायाव्यानारण्याग्राम्याश्चुषे ॥ ६ ॥ तस्माद्यज्ञात्सर्व्व हुत-
ऽऋचः सामानिजज्ञिरे ॥ छन्दाँसि जज्ञिरेतस्माद्यजुस्तस्माद-
जायत ॥ ७ ॥ तस्मादश्वाऽअजायन्तये केचोभयादतः ॥ गावो-
ह जज्ञिरेतस्मात्तस्माज्जाताऽअजावयः ॥८॥ तं यज्ञम्बर्हिषि-प्रौ-
क्षन्पुरुषञ्जातमग्रतः॥ तेनदेवाऽअयजन्तसाद्ध्याऽऋषयश्च ये ।९।
यत्पुरुषं व्यदधुः कतिधाव्यकल्पयन् ॥ मुखङ्किमस्यासीत्किम्बाहू
किमूरूपादाऽउच्येते ॥ १० ॥ ब्राह्मणोस्यमुखमासीद्बाहूरा-
जन्यः कृतः॥ ऊरूतदस्य यद्वैश्यः पद्भ्याँ शूद्रोऽअजायत ॥११॥

चन्द्रमामनसोजातश्चक्षोः सूर्योऽअजायत ॥ श्रोत्राद्वायुश्च प्रा-
णश्चमुखादग्निरजायत ॥ १२ ॥ नाभ्याऽआसीदन्तरिक्षꣳशी
र्ष्णोद्यौःसमवर्त्तत ॥ पद्भ्याम्भूमिर्द्दिशꣳ श्रोत्रात्तथालोकाँ २ऽ
अकल्पयन् ॥ १३ ॥ यत्पुरुषेणहविषादेवा यज्ञमतन्वत ॥ व-
न्तोऽस्यासीदाज्ज्यङ्ग्रीष्मऽइध्मःशरद्धविः ॥ १४ ॥ सप्तास्या-
सन्परिधयस्त्रिःसप्तसमिधःकृताः ॥ देवा यद्यज्ञन्तन्वानाऽअब-
ध्नन्पुरुषम्पशुम् ॥ १५ ॥ यज्ञेन यज्ञमयजन्तदेवास्तानिधर्म्माणि-
प्रथमान्यासन् ॥ तेहनाकम्महिमानःसचन्तयत्रपूर्व्वेसाद्ध्याः
सन्तिदेवाः ॥ १६ ॥ अद्भ्यःसम्भृतःपृथिव्यैरसाच्चविश्व-

कर्म्मणः समवर्त्तताग्रे ॥ तस्यत्वष्टाव्विदधद्रूपमेतितन्मर्त्यस्य-
देवत्वमाजानमग्रे ॥ १७ ॥ व्वेदाहमेतम्पुरुषम्महान्तमादित्य-
वर्णन्तमसःपरस्तात् ॥ तमेवव्विदित्वातिमृत्युमेतिनान्यःपन्था-
व्विद्यतेयनाय ॥ १८ ॥ प्रजापतिश्चरतिगर्भेऽअन्तरजायमानो-
बहुधाव्विजायते ॥ तस्य योनिम्परिपश्यन्तिधीरास्तस्मिन्नहतस्थु-
र्भुवनानिव्विश्व ॥ १९ ॥ योदेवेभ्योऽआतपतियोदेवानां
पुरोहितः ॥ पूर्वोयोदेवेभ्योजातोनमोरुचायब्राह्मये ॥२०॥
रुचम्ब्राह्मञ्जनयन्तोदेवाऽअग्रे तदब्रुवन् ॥ यस्त्वैवम्ब्राह्मणोव्विद्यात्त
स्यदेवाऽअसन्वशे ॥ २१ ॥ श्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रे

पाश्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम् ॥ इष्णन्निषाणामुम्मऽइषा-
णसर्व्वलोकम्मऽइषाण ॥२२॥ इति श्रीरुद्रे द्वितीयोऽध्यायः ॥२॥

हरिः ॐ आशुःशिशानोव्वृषभोनभीमोघनाघनःक्षोभणश्चर्ष-
णीनाम् ॥ सङ्क्रन्दनोनिमिषऽएकवीरःशतꣳसेनाऽअजयत्साक-
मिन्द्र ÷ ॥१॥सङ्क्रन्दनेनानिमिषेणजिष्णुनायुत्कारेणदुश्च्य-
वनेनधृष्णुना ॥ तादिन्द्रेणजयतुतत्सहद्ध्वं धुधोनरऽइषुहस्तेन-
व्वृष्णा ॥ २ ॥ सऽइषुहस्तैस्सनिषङ्गिभिर्व्वशीसꣳस्रष्टासयुध-
ऽइन्द्रोगणेन ॥ सुꣳसृष्टजित्सोमपाबाहुशर्ध्युग्रधन्व्वाप्रतिहिता-
भिरस्ता ॥ ३ ॥ बृहस्पते परिदीयारथेनरक्षोहामित्राँऽअपबाध-

मानꣳ ॥ प्रभञ्जन्त्सेना÷प्रमृणो युधाजयन्नस्माकमेदृध्यविता-
रथानाम्॥४॥बलविज्ञायस्थविरꣳप्रवीरꣳसहस्वान्वाजीसहमान-
ऽउग्रः ॥ अभिवीरोऽअभिसत्त्वासहोजाजैत्रमिन्द्ररथ मातिष्ठ-
गोवित् ॥ ५ ॥ गोत्रभिदङ्गोविदं वज्रबाहुञ्जयन्तमज्म-
प्रमृणन्तमोजसा ॥ इमꣳसजातऽअनुवीरयध्वमिन्द्रꣳसखायो-
ऽअनुसꣳरभध्वम् ॥ ६ ॥ अभिगोत्राणिसहसागाहमानोदयो-
ऽवीरःशतमन्युरिन्द्र÷ ॥ दुश्च्यवनः पृतनाषाडयुद्ध्योरमाकुꣳ
सेनाऽअवतुप्रवत्सु ॥ ७ ॥ इन्द्रऽआसान्नेताबृहस्पतिर्दक्षिणा-
यज्ञःपुरऽएतुसोम÷ ॥ देवसेनानामभिञ्जतीनाञ्जयन्तीनान्मु-

रुतो॑ष॒न्त्वग्र॑म् ॥८॥ इन्द्र॑स्य॒व्वृष्ण्णो॒व्वरु॑णस्य॒राज्ञ॑ऽआदि॒त्याना॑-
म्म॒रुता॒ᳪंशर्द्ध॑ऽउ॒ग्ग्रम् ॥ म॒हाम॑नसाम्भुवनच्च्य॒वाना॒ङ्घोषो॑दे॒वाना॒
ञ्जय॑ता॒मुद॑स्त्थात् ॥ ९ ॥ उद्धर्ष॑यमघव॒न्नायु॑धा॒न्युत्सत्त्व॑नाम्मा-
मकाना॒म्मना॑ᳪंसि ॥ उद्वृ॑त्त्रहन्न्वा॒जिना॒ंव्वाजि॑ना॒न्न्युद्रथ॑ना॒ञ्ज-
य॑तां॒ष्यन्तु॒घोषा॑ः ॥ १० ॥ अ॒स्म्माक॒मिन्द्र॒ᳪंसमृ॑तेषुद्ध्व॒जेष्व॒-
स्माक॒ᳪंष्वाऽइष॑व॒स्ताज॑यन्तु ॥ अ॒स्माकं॑व्वी॒राऽउत्त॑रेभवन्त्व॒स्माँ२
ऽउ॑देवाऽअवता॒हवे॑षु ॥ ११ ॥ अ॒मीषा॑ञ्चि॒त्तम्प्र॑तिलो॒भय॑न्तीगृ-
हा॒णाङ्गा॑न्न्यप्प्वे॒परे॑हि ॥ अ॒भिप्प्रेहि॒निर्द्द॑हहृ॒त्सुशोकै॑र॒न्धेना॒मित्रा॒-
स्तम॑सासचन्ताम् ॥१२॥ अव॑सृष्टापरा॑पत॒शरव्व्ये॒ब्रह्म॑सᳪंशिते ॥

गच्छामित्त्वान्न्यपंद्यस्वमामीषाङ्कश्चनोच्छिषः ॥१३॥ प्रेताजय तानर ऽइन्द्रोवः शर्म्मंयच्छतु॥उग्रावः सन्तुबाहवोनाधृष्याथथा-संथ ॥१४॥ असौयासेनामरुतःपरेषामभ्यैतिनऽओजसास्पर्द्धमाना॥ताङ्गूहततमसापव्व्रतेनयथामीऽअन्न्योऽअन्न्यन्नजानन्॥१५ यत्त्वबाणाःसम्पतन्तिकुमारान्विशिखाऽइव ॥ तन्नऽइन्द्रोबृहस्पतिरदितिःशर्म्मंयच्छतुव्विश्वाहाशर्म्मंयच्छतु॥१६॥ सर्माणितेव्वर्म्मणाच्छादायामिसोमस्त्वाराजामृतेनानुवस्ताम्॥उरोर्व्वरीयोव्वरुस्तेकृणोतुजयन्तन्त्वानुदेवामदन्तु ॥ १७ ॥

इति श्रीरुद्रे तृतीयोऽध्यायः ॥ ३ ॥

हरिः ॐ विभ्राड्बृहत्पिबतु सोम्म्यम्मद्ध्वायुर्द्धद्यज्ञपतावविहुतम्। वातजूतो योऽअभिरक्षति त्मना प्रजाः पुपोष पुरुधा विराजति॥१॥ उदुत्त्यञ्जातवेदसन्देवं वहन्ति केतवः। दृशे विश्वाय सूर्य्यम्॥२॥ येना पावक चक्षसा भुरण्यन्तञ्जनाँ २ ऽअनु। त्वं व्वरुण पश्यसि॥ ३॥ दैव्यावद्ध्वर्यू ऽआगतᳯ रथेन सूर्य्यत्वचा। मद्ध्वा यज्ञᳯ समञ्जाथे॥ तम्प्रत्क्नथायं व्वेनश्चित्रन्देवानाम्॥ ४॥ तम्प्रत्क्नथा पूर्व्वथा विश्वथेमथा ज्येष्ठतातिम्बर्हिषदᳯ स्वर्व्विदम्॥ प्रतीचीनं व्वृजनन्दोहसे धुनिमाशुञ्जयन्तमनु यासु व्वर्द्धसे॥ ५॥ अयं व्वेनश्चोदयत्पृश्निगर्भा ज्ज्योतिर्जरायू-

न॑सोव्वि॒माने॑ ॥ इ॒मम॒पाᳬ सं॑ग॒मेसू॒र्य्य॑स्य॒शिशु॒न्नव्विप्प्रा॑ म॒तिभी॑-
रिहन्ति ॥६॥ चि॒त्त्रन्दे॒वाना॒मुद॑गा॒दनी॑क॒ञ्चक्षु॒र्म्मि॒त्त्रस्य॒व्वरु॑ण-
स्या॒ग्ग्नेः ॥ आप्प्रा॒द्यावा॑पृथि॒वीऽअ॒न्तरि॑क्ष॒ᳬसूर्य्य॑ऽआ॒त्त्माजग॑तस्त॒
स्त्थुष॑श्च ॥७॥ आन॒ऽइडा॑भिर्व्वि॒दथे॑षु॒शस्तिव्विश्श्वानरः॑ सवि॒-
तादे॒वऽएतु ॥ अपि॒यथा॑ यु॒वानो॒मत्स॑थानो॒व्विश्व॒ञ्जग॑दभिपि॒त्वे-
म॑नी॒षा ॥ ८ ॥ य॒द॒द्यकच्चव्वृत्रहन्नु॒दगा॑ऽअ॒भिसू॑र्य्य ॥ सर्व्व॒-
न्तदि॑न्द्रते॒व्वशे॑ ॥ ९ ॥ त॒रणि॑र्व्वि॒श्श्वदर्शतोज्ज्योति॒ष्कृद॑सि-
सूर्य्य ॥ व्विश्श्व॒माभा॑सिरोच॒नम् ॥ १० ॥ तत्सूर्य्य॑स्यदेव॒त्वन्त-
न्न्म॑हि॒त्वम्म॒द्ध्याकर्त्तो॒र्वित॑त॒ᳬ सञ्ज॑भार ॥ य॒देदयु॑क्तह॒रित॑ः

सुधस्थादादद्रात्रीव्वासस्तनुतेसिमस्म्मै ॥ ११ ॥ तान्मित्र-
स्यव्वरुणस्याभिचक्षे सूर्य्योरूपङ्कृणुतेद्योरुपस्थे ॥ अनुन्तमुन्य-
द्रुशंदस्युपाजः कृष्णमुन्यद्धरितः सम्भरन्ति ॥ १२ ॥ बण्महाँ
२ऽअंसिसूर्य्यबडादित्यमहाँ २ऽअंसि ॥ महस्तेसतोमंहिमापनस्य-
ते द्वादेवमहाँ २ऽअंसि ॥१३॥ बट्सूषर्य्यश्रवंसामहाँ २ऽअंसि-
सत्रादेवमहाँ २ऽअंसि ॥ मन्हादेवानामसुषर्य्यः पुरोहितोव्विभु-
ज्ज्योतिरदाभ्यम् ॥ १४ ॥ श्रायंन्तऽइवसूषर्य्यव्विश्वेदिन्द्रस्य-
भक्षत ॥ व्वसूनिजातेजनंमानुऽओजसाप्रतिभागन्नदीधिम ॥१५॥
अद्यादेवाऽउदितःसूर्य्यस्यनिरंहसः पिपृतानिरवद्यात् ॥ तन्नो-

मित्रोव्वरु णोमामहन्तामदितिꣳसिन्धु ꣳपृथिवीऽउतद्यौः ॥१६॥ आकृष्णेनरजसावर्त्तमानोनिवे शयन्नमृतम्मर्त्यञ्च ॥ हिरण्ययेन सवितारथे नादे वो याति भुवनानिपश्यन् ॥ १७ ॥

इति श्रीरुद्रे चतुर्थोऽध्यायः ॥ ४ ॥

हरिः ॐ नमस्तेरुद्रमन्न्यवऽउतोतऽइषवेनम ꣳबाहुभ्यां मुतते नम ꣳ ॥ १ ॥ यातेरुद्रशिवातनूरघोरापापकाशिनी ॥ तयानस्तन्न्वाशन्तामयागिरिशन्ताभिचाकशीहि ॥२॥ यामिषुङ्गिरिशन्तहस्तेबिभर्ष्यस्तवे ॥ शिवाङ्गिरित्रताङ्कुरु माहिꣳसीः पुरुषञ्जगत् ॥ ३ ॥ शिवेनव्वचसात्वागिरिशाच्छावदामसि ॥

यथानः सर्व्वमिज्जगदयक्ष्मꣳसुमनाऽअसत् ॥ ४ ॥ अद्ध्यवोच-
दधिवक्ताप्रथमोदैव्योभिषक्॥अहीꣳश्चसर्वाञ्जम्भयन्त्सर्वाश्च-
यातुधान्योधराचीः परासुव॥ ५॥ असौयस्ताम्रोऽअरुणऽउतब-
भ्रुꣳसुमङ्गलः ॥ येचैनꣳरुद्राऽअभितोदिक्षुश्रिताः सहस्र-
शोवैषाꣳहेडऽईमहे॥६॥असौयोवसर्प्पतिनीलग्रीवोविलोहितः।
उतैनाङ्गोपाऽअदृश्रन्नदृश्रन्नुदहार्य्यꣳ सदृष्टोमृडयातिनः ॥७॥
नमोस्तुनीलग्रीवायसहस्राक्षायमीढुषे ॥ अथोयेऽअस्यसत्वानो-
हन्तेभ्योकरन्नमः ॥ ८ ॥ प्रमुञ्चधन्वन्त्वमुभयोरार्त्न्यो-
र्ज्यार्म् ॥ याश्चतेहस्तऽइषवःपराताभगवोव्वप ॥ ९॥ विज्यं

न्धनु÷कपर्दिनोव्विशल्ल्योबाणवाँ २ऽउत ॥ अनेशन्नस्यया-
ऽइवऽआमुरस्यनिषङ्गधिः ॥ १० ॥ यातेहेतिर्म्मीढुष्टमहस्ते
बभूवते धनु÷॥तयास्मान्न्विश्वतस्त्वमयक्ष्मयापरिब्भुज ॥११॥
परितेधन्वनोहेतिरस्मान्वृणक्तुव्विश्वतः÷॥अथोऽइषुधिस्तवा-
रेऽअस्मन्निधेहितम् ॥१२॥ अवतत्यधनुष्ट्वꣳसहस्राक्षशतेषुधे ॥
निशीर्ष्यशल्ल्यानाम्मुखाशिवोनः÷सुमनाभव ॥ १३ ॥नमस्तु
ऽआयुधायानातताय धृष्णवे ॥ उभाभ्यामुततेनमोबाहुभ्यान्त
वधन्वने ॥ १४ ॥ मानोमहान्तमुतमानोऽअर्भकम्मानऽउक्षन्त-
मुतमानऽउक्षितम् ॥ मानोव्वधोःपितरम्मोतमातरम्मानः÷प्रिया-

स्तुन्त्योरुद्ररीरिषः ॥ १५ ॥ मानस्तोकेतनयेमानऽआयुषि मानोगोषुमानोऽअश्वेषुरीरिषः ॥ मानोव्वीरान्रुद्रभामिनोव्वधीर्हविष्मन्तःसदमित्त्वाहवामहे ॥१६॥ पुनर्नमस्ते ॥१६॥ नमोहिरण्यबाहवे। सेनान्येदिशाञ्चपतयेनमोनमोव्वृक्षेब्भ्योहरिकेशेब्भ्यः पशूनाम्पतयेनमोनमः ÷ शष्पिञ्जरायत्विषीमतेपथीनाम्पतयेनमो नमोहरिकेशायोपवीतिनेपुष्टानाम्पतयेनमोनमोव्वब्भ्लुशायः ॥१७॥ नमोव्वब्भ्लुशायव्याधिनेन्नानाम्पतयेनमोनमो भवस्यहेत्यैजगतान्प तयेनमोनमोरुद्रायाततायिनेक्षेत्राणाम्पतयेनमोनमः ÷ सूताया हन्त्यैव्वनानाम्पतयेनमोनमोरोहिताय ॥ १८ ॥ नमोरोहिताय ।

स्थपतयेव्वृक्षाणाम्पतयेनमोनमोभुवन्तयेव्वारिवस्कृतायौषधीनाम्प
तयेनमोनमोमन्त्रिणेव्वाणिजायकक्षाणाम्पतयेनमोनमऽउच्चैर्घोषा
याक्रन्दयते पत्तीनाम्पतयेनमोनम ÷ कृत्स्नायतया ॥१९॥ नम ÷
कृत्स्नायतया । धावतेसत्वनाम्पतयेनमोनमःसहमानायनिव्या
धिनऽआव्याधिनीनाम्पतयेनमोनमो निषङ्गिणेकक्कुभायस्तेनानां
म्पतयेनमोनमोनिचेरवेपरिचरायारण्यानाम्पतयेनमोनमोव्वञ्चते
॥ २० ॥ नमोव्वञ्चते । परिवञ्चतेस्तायूनाम्पतयेनमोनमोनिषङ्गि
णेऽइषुधिमतेतस्कराणाम्पतयेनमोनम ÷ सृकायिब्योजिघाꣳ
सद्भ्योमुष्णताम्पतयेनमोनमोसिमद्भ्योनक्तञ्चरद्भ्योविकृन्तानां

म्पतयेनमः ÷ ॥ २१ ॥ नमऽऊष्णीषिणे । गिरिचरायकुलु
ञ्चानाम्पतयेनमोनमऽइषुमद्भ्योधन्वायिभ्यश्चवोनमोनमऽआत
न्वानेभ्यः ÷ प्रतिदधानेभ्यश्चवोनमोनमऽआयच्छद्भ्योस्यद्भ्य
श्चवोनमोनमोव्विसृजद्भ्यः ÷ ॥ २२ ॥ नमोविसृजद्भ्यो
व्विद्ध्यद्भ्यश्चवोनमोनमः ÷ स्वपद्भ्योजाग्रद्भ्यश्चवोनमोनमः
शयानेभ्यऽआसीनेभ्यश्चवोनमोनमस्तिष्ठद्भ्योधावद्भ्यश्चवोनमो
नमः ÷ सभाभ्यः ÷ ॥ २३ ॥ नमः ÷ सभाभ्यः ÷ । सभापति
भ्यश्चवोनमोनमोश्वेभ्योश्वपतिभ्यश्चवोनमोनमऽआव्याधिनीभ्योव्विविद्ध्यन्तीभ्यश्चवोनमोनमऽउगणाभ्यस्तृꣳहतीं

व्यश्चवोनमोनमोगणेभ्यः ÷ ॥ २४ ॥ नमोगणेभ्यो । गणपति
भ्यश्चवोनमोनमोव्रातेभ्योव्रातपतिभ्यश्चवो नमोनमोगृत्सेभ्यो
गृत्सपतिभ्यश्चवोनमोनमोविरूपेभ्योविश्वरूपेभ्यश्चवोन
मोनमःसेनाभ्यः ॥ २५ ॥ नमःसेनाभ्यः । सेनानिभ्यश्चवोन
मोनमोरथिभ्योऽअरथेभ्यश्चवोनमोनमः ÷ क्षत्तृभ्यः ÷ सङ्ग्रही
तृभ्यश्चवोनमोनःमोमहद्भ्योऽअर्भकेभ्यश्चवोनमः ÷ ॥ २६ ॥
नमस्तक्षभ्यः । नमस्तक्षभ्योरथकारेभ्यश्चवोनमोनमःकुलालेभ्य
ःकर्म्मारेभ्यश्चवोनमोनमोनिषादेभ्यः ÷ पुञ्जिष्ठेभ्यश्चवो
नमोनमः ÷ श्वनिभ्योमृगयुभ्यश्चवोनमोनमःश्वभ्यः ÷ ॥ २७ ॥

नम॒ꣳश्वभ्य॒ः । श्वप॑तिभ्यश्च वो॒नमो॒नमो॑भ॒वाय॑चरु॒द्राय॑च॒नम॑ः
श॒र्व्वाय॑चपशु॒पत॑येच॒नमो॒नील॑ग्ग्रीवायचशिति॒कण्ठा॑यच॒नम॑ः कप॒
र्द्दिने॑ ॥२८॥ नम॑ः कप॒र्द्दिने॑ । च॒व्व्युप्त॒केशायच॒नम॑ः सहस्रा॒क्षा
य॑चश॒तध॑न्न्वनेच॒नमो॑गिरिश॒याय॑चशिपिवि॒ष्टाय॑च॒नमो॑मी॒ढुष्ट॑माय॒चे
षु॑मतेच॒नमो॑ऱ्ह॒स्वाय॑ ॥ २९ ॥ नमो॑ऱ्ह॒स्वाय॑ । चव्वाम॒नाय॑च॒
नमो॑बृह॒तेच॒व्वर्षी॑यसे च॒नमो॑व्वृ॒द्धाय॑चस॒वृधे॑ च॒नमोग्ऱ्या॑यचप्प्रथ॒मा
य॑च॒नम॑ऽआ॒शवे॑ ॥ ३० ॥ नम॑ऽआ॒शवे॑ । चाजि॒राय॑च॒नम॒ꣳ
शीग्ऱ्या॑यच॒शीब्भ्या॑यच॒नम॒ऽऊर्म्म्या॑यचावस्व॒न्न्या॒यच॒नमो॑नादे॒या
य॑च॒द्द्वीप्प्या॑यच ॥ ३१ ॥ नमो॑ज्ज्येष्ठाय॑ । चक॒निष्ठाय॑च॒

नमः÷ पूर्व्वजायचापरजायचनमोमद्ध्यमायचापगल्भायचनमो जघन्यायचबुध्न्यायचनमःसोभ्यायः ॥ ३२ ॥ नमःसोभ्यायः । चप्रतिसर्य्यायचनमोयाम्यायचक्षेम्यायचनमःश्लोक्यायचावसान्यायचनमोऽउर्व्वर्य्यायचखल्यायचनमोव्वन्न्याय ॥ ३३ ॥ नमोव्वन्न्यायः । चकक्ष्यायचनमः÷ श्रवायचप्रतिश्रवायचनमोऽआशुषेणायचाशुरथायचनमःशूरायचावभेदिनेचनमोबिल्मिनेः ॥३४॥ नमोबिल्मिनेः । चकवचिनेचनमोव्वर्म्मिणेचव्वरूथिनेचनमः÷ श्रुतायचश्रुतसेनायचनमोदुन्दुभ्यायचाहनन्यायचनमोधृष्णवेः ॥ ३५ ॥ नमोधृष्णवेः । चप्रमृशायचनमोनिषङ्गिणेचेषुधिमतेच

नमस्तीक्ष्णेषवेचायुधिनेचनम÷ स्वायुधायचसुधन्वनेच ॥३६॥
नमःस्तुत्याय । चपथ्यायचनमःकाट्यायचनीप्यायचनमःकुल्यायचसरस्यायचनमोनादेयायचवैशन्तायचनमःकूप्याय ॥
॥३७॥ नमःकूप्याय । चावट्यायचनमोव्वीद्ध्र्यायचातप्याय चनमोमेघ्यायचविद्युत्यायचनमोव्वर्ष्यायचावर्ष्यायचनमोव्वात्याय ॥ ३८ ॥ नमोव्वात्याय । चरेष्म्यायचनमोव्वास्तव्यायच व्वास्तुपायचनमःसोमायचरुद्रायचनमस्ताम्रायचारुणायचनम÷ शङ्गवे ॥ ३९ ॥ नम÷ शङ्गवे । चपशुपतयेचनमऽउग्रायच भीमायचनमोग्रेवधायचदूरेवधायचनमोहन्त्रेचहनीयसेचनमोव्वक्षे

भ्योहरिकेशेभ्योनमस्ताराय ॥ ४० ॥ नमः शम्भवायः । चमयोभवायचनमः शङ्कारायचमयस्कारायचनमः शिवायचशिवतरायच ॥ ४१ ॥ नमःपार्ण्यायः । चावाट्यायचनमः प्रतरणायचोत्तरणायचनमस्तीर्थ्यायचकुल्यायचनमः शष्प्यायचफेन्यायचनमः सिकत्यायः ॥४२॥ नमः सिकत्यायः । चप्रवाह्यायचनमः किंशिलायचक्षयणायचनमः कपर्दिनेचपुलस्तयेचनमोऽइरिण्यायचप्रपथ्यायचनमोव्रज्यायः ॥ ४३ ॥ नमोव्रज्यायः । चगोष्ठ्यायचनमस्तल्प्यायचगेह्यायचनमोहृदय्यायचनिवेष्प्यायचनमःकाट्यायचचह्वरेष्ठायचनमःशुष्क्यायः ॥ ४४ ॥

नमः शुष्क्याय । चहरित्याय चनमः ÷ पाꣳसव्याय चरजस्याय च
नमो लोप्याय चोलप्याय चनम ऊर्व्याय च सूर्व्याय चनमः ÷ पर्ण्या
य ॥४५॥ नमः ÷ पर्ण्याय । चपर्णशदाय चनम उद्गुरमाणाय चा
भिघ्नते चनमः आखिदते चप्रखिदते चनम इषुकृद्भ्यो धनुष्कृद्भ्य
श्च वो नमो नमो वः किरिकेभ्यो देवानाꣳ हृदयेब्भ्यो नमो विचिन्वत्के
ब्भ्यो नमो विक्षिणत्केब्भ्यो नम आनिर्हतेब्भ्यः ÷ ॥४६॥ द्राप्ये अ
न्धसस्पते दरिद्रन्नीललोहित ॥ आसाम्प्रजानाम्मेषाम्पशूनाम्मा
भेर्म्मारोङ्मोचन्नः किञ्चनाममत् ॥४७॥ इमारुद्राय । तवसेकप
र्दिने क्षयद्वीराय प्रभरामहेमतीः ॥ यथाशमसद्द्विपदेचतुष्पदे वि

श्श्वम्पुष्टङ्ग्रामेऽअस्मिन्ननातुरम् ॥ ४८ ॥ याते । रुद्रशिवातनूः शिवाव्विश्श्वाहाभेषजी ॥ शिवारुतस्यभेषजीतयानोमृडजीवसे ॥ ४९ ॥ परिनोरुद्द्रस्यहेतिर्व्वृणक्तुपरित्वेषस्यदुर्म्मतिरघायोः ॥ अवस्थिरामघवद्भ्यस्तनुष्ष्वमीढ्वस्तोकायतनयायमृड ॥५०॥ मीढुष्टमशिवतमशिवोनः सुमनाभव ॥ परमेव्वृक्षऽआयुधन्निधाय कृत्तिंव्वसानऽआचरपिनाकम्बिभ्रदागहि ॥५१॥ व्विकिरिद्द्रव्विलोहितनमस्तेऽअस्तुभगवः ॥ यास्तेसहस्रꣳहेतयोन्न्यमस्म्यन्निवपन्तुताः ॥५२॥ सहस्राणिसहस्रशोबाह्वोस्तवहेतयः ॥ तासामीशानोभगवःपराचीनामुखाकृधि ॥ ५३ ॥ असङ्ख्यातासहस्राणि

येरुद्राऽअधिभूम्याम् ॥ तेषाꣳसहस्रयोजनेवधन्वानितन्मसि ॥ ५४ ॥ अस्मिन्महत्यर्णवेन्तरिक्षेभवाऽअधि ॥ तेषाꣳसहस्रयोजनेवधन्वानितन्मसि ॥ ५५ ॥ नीलग्रीवाःशितिकण्ठाद्दिवꣳरुद्राऽउपश्रिताः ॥ तेषाꣳसहस्रयोजनेवधन्वानितन्मसि ॥ ५६ ॥ नीलग्रीवाःशितिकण्ठाः÷ शर्व्वाऽअधःक्षमाचराः ॥ तेषाꣳसहस्रयोजनेवधन्वानितन्मसि ॥ ५७ ॥ येवृक्षेषु । शष्पिञ्जरानीलग्रीवाव्विलोहिताः ॥ तेषाꣳसहस्रयोजनेवधन्वानितन्मसि ॥ ५८ ॥ येभूतानामधिपतयोव्विशिखासः÷ कपर्द्दिनः÷ ॥ तेषाꣳसहस्रयोजनेवधन्वानितन्मसि ॥ ५९ ॥ येपथाम्पथिरक्षयऽऐलबृदाऽ

आ॑यु॒र्य्युध॑ ÷ ॥ तेषा॑ᳬसहस्रयोज॒नेव॒धन्वा॑नितन्मसि ॥ ६० ॥
येती॒र्त्थानि॑प्र॒चर॑न्तिसृ॒काह॑स्तानिष॒ङ्गिण॑ ÷ ॥ तेषा॑ᳬसहस्रयो
ज॒नेव॒धन्वा॑नितन्मसि ॥६१॥ येन्ने॑षु । वि॒विध्य॑न्ति॒पात्रे॑षु॒पिब॑
तो॒जना॑न् ॥ तेषा॑ᳬसहस्रयोज॒नेव॒धन्वा॑नितन्मसि ॥६२॥ यऽए॒ता
व॑न्तश्च॒भूया॑ᳬसश्च॒दिशो॑रु॒द्राव्वितस्थि॒रे ॥ तेषा॑ᳬसहस्रयोज॒ने
व॒धन्वा॑नितन्मसि ॥ ६३ ॥ नमो॑स्तु । रु॒द्रेब्भ्यो॒येदि॒वियेषां॑व्व॒र्ष
मिष॑वः ॥ तेब्भ्यो॒दश॒प्प्राची॒र्द्दश॑दक्षि॒णादश॑प्प्र॒तीची॒र्द्दशोदी॑ची॒र्द्द
शो॒र्द्ध्वाः ॥ तेब्भ्यो॒नमो॑ऽअस्तु॒तेनो॑वन्तु॒तेनो॑मृडयन्तु॒तेयन्द्वि॒ष्मोय
श्च॑नो॒द्वेष्टि॒तमे॑षा॒ञ्जम्भे॑दध्मः ॥ ६४ ॥ नमो॑स्तु । रु॒द्रेब्भ्यो॒ये॒न्तरि॑

क्षेभ्येषांव्वातऽइषवः ॥ तेभ्योदशप्राचीर्दशदक्षिणादशप्रतीची
र्दशोदीचीर्दशोद्ध्वाः ॥ तेभ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुते
यन्द्विष्मोयश्चनोद्द्वेष्टितमेषाञ्जम्भेदध्मः ॥ ६५ ॥ नमोस्तुरुद्रे
भ्योयेपृथिव्याँय्येषामन्नमिषवः ॥ तेभ्योदशप्राचीर्दशदक्षि
णादशप्रतीचीर्दशोदीचीर्दशोद्ध्वाः ॥ तेभ्योनमोऽअस्तुतेनोव
न्तुतेनोमृडयन्तुतेयन्द्विष्मोयश्चनोद्द्वेष्टितमेषाञ्जम्भेदध्मः ॥६६॥
इति श्रीरुद्रे पञ्चमोऽध्यायः ॥ ५ ॥

★

पुनर्नमस्ते षोडशकं जप्त्वा ॥ ॐ एषतेरुद्रभागःसहस्व स्राम्बिकयातञ्जुषस्वस्वाहैषतेरुद्रभागऽआखुस्तेपशुः ॥१॥ अव रुद्रमदीमह्यवदेवन्त्र्यम्बकम् ॥ यथानोव्वस्यसस्करद्यथानःश्रेय सस्करद्यथानोव्व्यवसायया त् ॥२॥ नमस्तेरुद्रमन्न्यवऽउतोतऽइषवे नमः ÷ ॥ बाहुभ्यामुततेनमः ÷ ॥ १ ॥ यातेरुद्रशिवातनूरघोरापा पकाशिनी ॥ तयानस्तन्न्वाशन्तमयागिरिंशन्ताभिचाकशीहि ॥२॥ नतम्ब्विदाथसऽइमाजजानान्यद्युष्माकमन्तरम्बभूव ॥ नीहारेणप्रा वृताजल्प्याचासुतृपऽउक्थशासश्चरन्ति ॥१॥ व्विश्वकर्म्मर्ह्यजनि ष्टदेवऽआदिद्गन्धर्व्वोऽअभवद्द्वितीयं ÷ ॥ तृतीयं ÷ पिताजनि

तौष॑धीनाम॒पाङ्गर्ब्भ॒र्व्व्य॒दधात्पुरु॒त्त्रा ॥ २ ॥ मीढु॑ष्टम॒शिव॑तमशि॒वो न॑ ÷ सु॒मना॑भव ॥ प॒र॒मेव्वृ॒क्षऽआयु॑धन्नि॒धाय॒कृत्तिं॒व्वसा॑न॒ऽआच॑र॒पिना॑क॒म्बिभ्र॒दाग॑हि ॥१॥ व्विकि॑रिद्र॒व्विलो॑हित॒नम॑स्तेऽअस्तुभगवः॑॥ यास्ते॑स॒हस्र॑ꣳहे॒तयो॒न्यम॒स्म्मन्निव॑पन्तु॒ताः ॥ २ ॥ स॒हस्रा॑णिसहस्र॒शोबा॒ह्वोस्तव॑हे॒तय॑ ÷ ॥ तासा॒मीशा॑नोभगवः॑परा॒चीना॒मुखा॑कृधि ॥३॥ अस॑ङ्ख्यातास॒हस्रा॑णि॒येरु॒द्द्राऽअधि॒भूम्या॑म् ॥ तेषा॑ꣳसहस्रयोज॒नेव॒धन्न्वा॑नितन्न्मसि ॥ ४ ॥

व्व॒यꣳसो॑मव्व्र॒तेतव॒मन॑स्त॒नू षु॒बिब्भ्र॑तः ॥ प्र॒जाव॑न्तः॑सचेमहि ॥१॥ ए॒षते॑रुद्द्रभा॒गः॑स॒हस्वस्राम्बि॑कया॒तञ्जु॑षस्व॒स्वाहै॒षते॑रुद्द्रभा॒

गऽआखुस्तेपशुः ॥ २ ॥ अवरुद्रमदीमहवदेवन्त्र्यम्बकम् ॥ यथानोव्वस्यसस्करद्यथानऽश्रेयसस्करद्यथानोव्व्यवसाययात्॥३॥ भेषजमसि । भेषजङ्गवेश्वायपुरुषायभेषजम् ॥ सुखम्मेषायमेष्यै ॥४॥ त्र्यम्बकंयजामहेसुगन्धिम्पुष्टिवर्द्धनम् ॥ उर्व्वारुकमिवबन्धना न्मृत्योर्मुक्षीयमामृतात् ॥ त्र्यम्बकंयजामहेसुगन्धिम्पतिवेदनम् ॥ उर्व्वारुकमिवबन्धनादितोमुक्षीयमामुतः ॥ ५ ॥ एतत्ते । रुद्रावसन्तेनपरोमूजवतोतीहि ॥ अवततधन्वापिनाकावसःकृत्तिवासाऽअहिँसन्नःशिवोतीहि ॥ ६ ॥ त्र्यायुषञ्जमदग्नेःकश्यपस्य त्र्यायुषम् ॥ यद्देवेषुत्र्यायुषन्तन्नोऽअस्तुत्र्यायुषम् ॥ ७ ॥ शिवो

नामांसिस्वधितिस्तेपितानमस्तेऽअस्तुमामाहिꣳसीः ॥ निर्वर्त्तया म्यायुषेन्नाद्यायप्रजननायरायस्पोषायसुप्रजास्त्वायसुवीर्य्यायं । ८ ॥ इति श्रीरुद्रे षष्ठोऽध्यायः ॥ ६ ॥

हरिः ॐ व्विश्वतश्चक्षुरुतव्विश्वतोमुखोव्विश्वतोब्बाहुरुतव्विश्वतस्पात् ॥ सम्बाहुभ्यान्धमतिसम्पतत्त्रैर्द्यावाभूमीजनयन्देवऽएकः ॥ १ ॥ व्वाजश्चमेप्रसवश्चमेप्रयतिश्चमेप्रसितिश्चमे धीतिश्चमेक्रतुश्चमेस्वरश्चमेश्लोकश्चमेश्रवश्चमेश्रुतिश्चमेज्योतिश्च मेस्वश्चमेयज्ञेनकल्पन्ताम् ॥ २ ॥ प्राणश्चमेपानश्चमेव्यानश्चमेसुश्चमेचित्तञ्चमऽआधीतञ्चमेव्वाक्चमेमनश्चमेचक्षुश्चमे

श्रोत्रञ्चमेदक्षश्चमेबलञ्चमेयज्ञेनकल्पन्ताम् ॥ ३ ॥ उग्रश्चभी मश्चध्वान्तश्चधुनिश्च ॥ सासह्वाँश्चाभियुग्वाचंव्विक्षिपꣳ स्वाहा ॥ ४ ॥ अग्निꣳहृदयेनाशनिꣳहृदयाग्रेणपशुपतिङ्कृत्स्नहृदये नभुवंयक्रा ॥ शर्व्वम्मतस्नाभ्यामीशानम्मन्न्युनामहादेवमन्तꣳ पर्शव्येनोग्रन्देवंव्वनिष्ठुनाव्वसिष्ठुहनुꣳ शिङ्गीनिकोश्याभ्याम् ॥ ५ ॥ उग्ग्रँल्लोहितेनमित्रꣳसौव्व्रत्येनरुद्रन्दौव्व्रत्येनेन्द्रम्प्रक्क्रीडेनमरुतोबलेनसाद्ध्यान्प्रमुदा ॥ भवस्यकण्ठ्यꣳरुद्रस्यान्तꣳपार्श्व्यम्महादेवस्ययकृच्छर्व्वस्यव्वनिष्ठ्ठुःपशुपतेꣳ पुरीतत् ॥ ६ ॥ इमामेऽअग्नुऽइष्टकाधेनवः ÷ सन्त्वेकाचदशाचदशाचशताश्चशताश्च

सहस्रंश्चसहस्रंश्चायुतंश्चायुतंश्चनियुतंश्चनियुतंश्च प्रयुतंश्चार्ब्बुदंश्च न्यर्ब्बुदंश्चसमुद्रंश्चमध्यंश्चान्तंश्चपरार्द्धंश्चैतामेऽअग्नऽइष्टकाधेनवः ÷ सन्त्वमुत्रामुष्मिँल्लोके[1] ॥७॥ यतोयतःसमीहसेततोनोऽअभयङ्कुरु॥ शन्नः ÷ कुरुप्रजाभ्योभयन्नःपशुभ्यः ÷ ॥८॥ विश्वानिदेवसवितर्दुरितानिपरासुव ॥ यद्भद्रन्तन्नऽआसुव ॥९॥ नमस्तेहरसेशोचिषे नमस्तेऽअस्त्वर्चिषे ॥ अन्न्याँस्तेऽअस्मत्तपन्तुहेतयः ÷ पावकोऽअस्मभ्यंशिवोभव ॥१०॥ नमस्तेऽअस्तुविद्युतेनमस्तेस्तनयित्नवे॥

---

१. केचिदित उत्तरमेव 'ऋचंवाचम्' इत्याद्यध्यायमेव पठन्ति। नैताष्टमादिकान्मन्त्रान्। स चाध्यायोऽग्रे दर्शितः।

नमस्तेभगवन्नस्तुवत्स्व ÷ समीहसे ॥११॥ पयः ÷ पृथिव्याम्प
युऽओषधीषुपयोदिव्युन्तरिक्षेपयोधाः ॥ पयस्वतीःप्रदिशः ÷ स
न्तुमह्यम् ॥१२॥ व्विष्णोरराटमसिव्विष्णोःश्नप्त्रेस्थोव्विष्णोःस्यूर
सिव्विष्णोर्ध्रुवोसि ॥ व्वैष्णवमसिव्विष्णवेत्वा ॥ १३ ॥ अग्निर्दे
वतावातोदेवतासूर्य्योदेवता चन्द्रमादेवताव्वसवोदेवता रुद्रादेवता
दित्यादेवतामरुतोदेवताव्विश्वेदेवादेवताबृहस्पतिर्देवतेन्द्रोदेवताव्व
रुणोदेवता ॥ १४ ॥ द्यौःशान्तिरन्तरिक्षꣳशान्ति ÷ पृथिवीशान्ति
रापःशान्तिरोषधयःशान्ति ÷ ॥ व्वनस्पतयःशान्तिर्व्विश्वेदेवाः
शान्तिर्ब्रह्मशान्तिःसर्व्वꣳशान्तिःशान्तिरेवशान्तिःसामाशान्तिरेधि

॥१५॥ मूर्धासिराड् ध्रुवासिधरुणाधर्त्र्यसिधरणी ॥ आयुषेत्वावर्चसेत्वाकृष्यैत्वाक्षेमायत्वा ॥१६॥ ऋचंवाचम्प्रपद्येमनोयजुःप्रपद्ये सामंप्राणम्प्रपद्येचक्षुःश्रोत्रम्प्रपद्ये ॥ व्वागोजः÷ सहौजोमयिप्राणापानौ ॥१७॥ यन्मेछिद्रञ्चक्षुषोहृदयस्यमनसोव्वातितृण्णम्बृहस्पतिर्म्मेतद्दधातु ॥ शन्नोभवतुभुवनस्ययस्पतिः÷ ॥१८॥ भूर्भुवःस्वः÷ तत्सवितुर्व्वरेण्यम्भर्गोदेवस्यधीमहि ॥ धियोयोनः÷ प्रचोदयात् ॥१९॥ अपाम्फेनेनुनमुचेःशिरऽइन्द्रोदवर्त्तयः ॥ विश्वाहदजयस्पृधः÷ ॥ २० ॥ सोमोराजामृतङ्गसुतऽऋजीषेणाजहान्मृत्युम् ॥ ऋतेनसत्यमिन्द्रियम्व्विपानङ्गशुक्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृ

त॒म्मधु॑ ॥२१॥ हिर॒ण्मये॑न॒पात्रे॑णस॒त्यस्यापि॑हित॒म्मुख॑म् ॥ यो॒सा
वा॑दि॒त्येपुरु॑ष॒ꣳसो॒सावह॒म् ॥ २२ ॥ तच्चक्षु॑र्दे॒वहि॑तम्पु॒रस्ता॑च्छु॒क्रमुच्च॑
रत् ॥ पश्ये॑मश॒रद॑ ÷ श॒तञ्जीवे॑मश॒रद॑ ÷ श॒तꣳशृणु॑यामश॒रद॑ ÷
श॒तम्प्रब्ब्र॑वामश॒रद॑ ÷ श॒तमदी॑नाꣳस्यामश॒रद॑ ÷ श॒तम्भूय॑श्चश॒र
द॑ ÷ श॒तात् ॥ २३ ॥ स्व॒स्तिन॒ऽइन्द्रो॑वृ॒द्धश्र॑वाꣳस्व॒स्तिन॑ ÷ षू॒षा
व्वि॒श्ववे॑दाꣳ ॥ स्व॒स्तिन॒स्तार्क्ष्यो॒ऽअरि॑ष्टनेमिꣳस्व॒स्तिनो॒बृह॒स्पति॑र्द्द
धातु ॥ २४ ॥ मनो॑जू॒तिर्जु॑षता॒माज्ज्य॑स्य॒बृह॒स्पति॑र्य्य॒ज्ञमि॒मन्त॑नो॒
त्त्वरि॑ष्टंय॒ज्ञꣳसमि॒मन्द॑धातु ॥ व्विश्वे॑दे॒वास॑ऽइ॒हमा॑दयन्ता॒मो३ँम्प्र
तिष्ठ ॥२५॥ नम॑ ÷ शम्भ॒वाय॑चमयोभ॒वाय॑च॒नम॑ ÷ शङ्क॒राय॑चम

यस्क॒राय॑च॒नम॑ ÷ शि॒वाय॑चशि॒वत॑रायच ॥ २६ ॥ इति षडङ्गरुद्रे सप्तमेऽध्याये शान्तिपाठः[१] ॥ ७ ॥

हरिः ॐ उ॒ग्रश्च॑ । भी॒मश्च॒ध्वा॒न्तश्च॒धुनि॑श्च ॥ सा॒स॒ह्वाँश्चा॑भियु॒ग्वाच॑व्वि॒क्षिपः॒ स्वाहा॑ ॥ १ ॥ अ॒ग्निꣳहृद॑येना॒शनि॑ꣳहृदया॒ग्ग्रेण॑पशु॒पति॑ङ्कृत्स्न॒हृद॑येनभ॒वंप्य॒क्ना ॥ श॒र्व्वम्मत॑स्न्नाब्भ्या॒मीशा॑नम्म॒न्न्युना॑महादे॒वम॑न्तः पर्श॒व्व्येनो॒ग्ग्रन्दे॒वंव्व॑नि॒ष्ठुना॑व्वसिष्ठ॒हनुः॒ शिङ्गी॑निको॒श्याब्भ्या॑म् ॥ २ ॥ उ॒ग्ग्रँल्लोहि॑तेन । मि॒त्त्रꣳसौव्व्र॑त्त्येन

१. केचिदेतं सप्तममध्यायमपठित्वा उग्रश्चेति सप्त, वाजश्चमे इत्याद्या एकोनविंशत् कण्डिकाश्च पठन्ति, ताश्च यथा—

रुद्रन्दौर्व्रीच्येनेन्द्रम्प्रक्रीडेनमरुतोबलेनसाद्धयान्प्रमुदा ॥ भव स्यकण्ठ्यꣳरुद्रस्यान्तःपार्श्व्यम्महादेवस्ययकृच्छ्लोम्न्यꣳवनिष्ठुः पशुपतेꣳपुरीतत् ॥३॥ लोमभ्यꣳ स्वाहा । लोमभ्यꣳस्वाहात्वचे स्वाहात्वचेस्वाहालोहिताय स्वाहालोहिताय स्वाहामेदोभ्यꣳस्वाहा मेदोभ्यꣳस्वाहामाꣳसेभ्यꣳस्वाहामाꣳसेभ्यꣳस्वाहास्नावभ्यꣳ स्वाहास्नावभ्यꣳस्वाहाऽस्थभ्यꣳस्वाहाऽस्थभ्यꣳस्वाहामज्ञभ्यꣳ स्वाहामज्ञभ्यꣳस्वाहा ॥ रेतसे स्वाहापायवेस्वाहा ॥ ४ ॥ आया सायस्वाहा । प्रायासायस्वाहासंय्यासायस्वाहाव्वियासायस्वाहो द्यासायस्वाहा ॥ शुचेस्वाहाशोचतेस्वाहाशोचमानायस्वाहाशो

कायस्वाहा ॥ ५ ॥ तपसेस्वाहातप्यतेस्वाहातप्यमानायस्वाहा तप्तायस्वाहाघर्म्मायस्वाहा ॥ निष्क्रुत्यैस्वाहाप्रायश्चित्यैस्वाहा भेषजायस्वाहा ॥ ६ ॥ शमायस्वाहान्तकायस्वाहामृत्यवेस्वाहा । ब्रह्मणेस्वाहाब्रह्महत्यायैस्वाहाविश्वेभ्योदेवेभ्यःस्वाहा द्यावापृथिवीभ्याꣳस्वाहा ॥ ७ ॥ इति सप्तमोऽध्यायः ॥ ७ ॥

हरिः ॐ व्वाजश्चमेप्रसवश्चमेप्रयतिश्चमेप्रसितिश्चमेधीतिश्चमे क्रतुश्चमेस्वरश्चमेश्लोकश्चमेश्रवश्चमेश्रुतिश्चमे ज्ज्योतिश्चमे स्वश्चमेयज्ञेनकल्पन्ताम् ॥१॥ प्राणश्चं । मेऽपानश्चमेव्व्यानश्चमेसुश्चमेचित्तञ्चमऽ आधीतञ्चमेव्वाक्चमेमनश्चमे चक्षुश्चमेश्श्रोत्रञ्चमेदक्षश्चमेबलञ्च मेयज्ञेनकल्पन्ताम् ॥२॥ ओजश्च । मेसहश्चमऽआत्क्माचमेतनू श्चमेशर्म्मचमेव्वर्म्मचमेङ्गानिचमेस्थीनिचमेपरूꣳषिचमेशरीराणि चमआयुश्चमेजराचमेयज्ञेनकल्पन्ताम् ॥ ३ ॥ ज्ज्यैष्ठ्यञ्च । मऽ आधिपत्यञ्चमेमन्न्युश्चमेभामश्चमे मꣳश्चमेम्भश्चमेजेमाचमेमहिमाचमेव्वरिमाचमेप्रथिमाचमेव्वर्षिमाचमेद्राघिमाचमेव्वृद्धञ्चमे

व्वृद्धिश्चमेयज्ञेनकल्पन्ताम् ॥४॥ सत्यश्चं । मेश्रद्धाचंमेजगच्चमेधन
श्चमेव्विश्वंश्चमेमहंश्चमे क्रीडाचंमे मोदंश्चमेजातंश्चमे जनिष्यमाण
श्चमेसूक्तंश्चमेसुकृतंश्चमेयज्ञेनकल्पन्ताम् ॥५॥ ऋतंश्चं । मेमृतंश्चमेय
क्ष्मञ्चमेनामयच्चमेजीवातुंश्चमेदीर्घायुत्वञ्चंमेनमित्रञ्चमेभयंश्चमे
सुखंश्चमेशयनंश्चमेसूषाश्चंमेसुदिनंश्चमेयज्ञेनकल्पन्ताम् ॥६॥ यन्ता
चं । मेधर्ताचंमेक्षेमंश्चमेधृतिंश्चमेव्विश्वंश्चमेमहंश्चमेसंव्विच्चमेज्ञात्रं
श्चमेसूश्चंमेप्रसूश्चंमेसीरंश्चमेलयंश्चमेयज्ञेनकल्पन्ताम् ॥७॥ शञ्चं ।
मेमयंश्चमेप्रियञ्चंमेनुकामश्चंमेकामंश्चमेसौमनसश्चंमे भगंश्चमे
द्रविंणश्चमेभद्रञ्चंमेश्रेयंश्चमेव्वसीयश्चमे यशंश्चमे यज्ञेनकल्प

न्ताम् ॥८॥ ऊक्च॑ । मेसृ॒नृता॑चमे॒पय॑श्चमे॒रस॑श्चमेघृ॒तञ्च॑मे॒मधु॑च मे॒सग्ध्य॑श्चमे॒सपी॑तिश्चमेकृ॒षिश्च॑मे॒वृष्टि॑श्चमे॒जैत्र॑श्चम॒औद्भि॒द्यश्च मे॒यज्ञे॑नकल्पन्ताम् ॥९॥ र॒यिश्च॑ । मे॒राय॑श्चमेपु॒ष्टञ्च॑मे॒पुष्टि॑श्चमे व्वि॒भुच॑मेप्र॒भुच॑मेपू॒र्ण्ञ्च॑मेपू॒र्णत॑रश्चमे॒कुय॑वञ्च॒मे॒क्षि॑तञ्च॒मे॒न्नञ्च॒ मेक्षु॑चमे॒यज्ञे॑नकल्पन्ताम् ॥१०॥ व्वि॒त्तञ्च॑ । मे॒वेद्य॑श्चमेभू॒तञ्च॑मे भवि॒ष्यच्च॑मेसु॒गञ्च॑मेसुप॒त्थ्य॒श्चम॒ऽऋ॒द्धञ्च॑म॒ऽऋ॒द्धिश्चमेक्लृ॒प्तञ्च॑मे क्लृप्ति॒श्चमे॒म॒तिश्च॑मेसु॒म॒तिश्च॑मे॒यज्ञे॑नकल्पन्ताम् ॥ ११ ॥ व्व्रीह यश्च । मे॒ष॒वा॑श्चमे॒माषा॑श्चमे॒तिला॑श्चमेमु॒द्गा॑श्चमे॒खल्वा॑श्चमेप्रि यङ्ग॑वश्चमे॒ण॑वश्चमेश्य॒मा॑का॑श्चमे नी॒वारा॑श्चमेगो॒धूमा॑श्चमेम॒सूरा॑

श्वमेयज्ञेनकल्पन्ताम् ॥ १२ ॥ अश्माचमेमृत्तिकाचमेगिरयश्चमेपर्वताश्चमेसिकताश्चमेवनस्पतयश्चमेहिरण्यञ्चमेयश्चमेश्यामञ्चमेलोहञ्चमेसीसञ्चमेत्रपुचमेयज्ञेनकल्पन्ताम् ॥ १३ ॥ अग्निश्चमेऽआपश्चमेव्रीरुधश्चमऽओषधयश्चमेकृष्टपच्याश्चमेकृष्टपच्याश्चमेग्राम्याश्चमेपशव आरण्याश्चमेवित्तञ्चमेवित्तिश्चमेभूतञ्चमेभूतिश्चमेयज्ञेनकल्पन्ताम् ॥ १४ ॥ वसुंच । मेवसतिश्चमेकर्म्मचमेशक्तिश्चमेऽर्थश्चमऽएमश्चमऽइत्याचमेगतिश्चमेयज्ञेनकल्पन्ताम् ॥ १५ ॥ अग्निश्च । मऽइन्द्रश्चमेसोमश्चमऽइन्द्रश्चमेसविताचमऽइन्द्रश्चमेसरस्वतीचमऽइन्द्रश्चमेपूषाचमऽइ

न्द्रश्च मे बृहस्पतिश्च मऽइन्द्रश्च मे यज्ञेन कल्पन्ताम् ॥ १६ ॥ मित्रश्च । मऽइन्द्रश्च मे वरुणश्च मऽइन्द्रश्च मे धाता च मऽइन्द्रश्च मे त्वष्टा च मऽइन्द्रश्च मे मरुतश्च मऽइन्द्रश्च मे विश्वे च मे देवाऽइन्द्रश्च मे यज्ञेन कल्पन्ताम् ॥ १७ ॥ पृथिवी च । मऽइन्द्रश्च मे न्तरिक्षञ्च मऽइन्द्रश्च मे द्यौश्च मऽइन्द्रश्च मे समाश्च मऽइन्द्रश्च मे नक्षत्राणि च मऽइन्द्रश्च मे दिशश्च मऽइन्द्रश्च मे यज्ञेन कल्पन्ताम् ॥१८॥ अहः शुश्च । मे रश्मिश्च मे दाब्ध्यश्च मे धिपतिश्च मऽउपाꣳशुश्च मे न्तर्यामश्च मऽऐन्द्रवायवश्च मे मैत्रावरुणश्च मऽआश्विनश्च मे प्रतिप्रस्थानश्च मे शुक्रश्च मे मन्थी च मे यज्ञेन कल्पन्ताम् ॥१९॥ आग्रयणश्च । मे वैश्वदेवश्च मे

ध्रुवश्चमेव्वैश्वानरश्चमऽऐन्द्राग्नश्चमेमहावैश्वदेवश्चमेमरुत्वती
याश्चमेनिष्केवल्यश्चमेसावित्रश्चमे सारस्वतश्चमे पात्नीवतश्चमे
हारियोजनश्चमेयज्ञेनकल्पन्ताम् ॥२०॥ स्रुचश्च । मेचमसाश्चमे
ग्वायव्यानिचमेद्रोणकलशश्चमेग्रावाणश्चमेधिषवणेचमेपूतभृच्चमऽ
आधवनीयश्चमेवेदिश्चमेबर्हिश्चमेवभृथश्चमेस्वगाकारश्चमेयज्ञेन
कल्पन्ताम् ॥ २१ ॥ अग्निश्च । मेघर्म्मश्चमेर्कश्चमेसूर्य्यश्चमेप्रा
णश्चमेश्वमेधश्चमेपृथिवीचमेदितिश्चमेदितिश्चमेद्यौश्चमेङ्गुलयः
शक्वरयोदिशश्चमेयज्ञेनकल्पन्ताम् ॥२२॥ व्रतञ्च । मऽऋतवः
श्चमेतपश्चमेसंवत्सरश्चमेहोरात्रेऽऊर्व्वष्ठीवेबृहद्रथन्तरेचमेयज्ञेनक

ल्पन्ताम् ॥२३॥ एकां॑च । मे॒ति॒स्र॒श्च॒मे॒ति॒स्र॒श्च॒मे॒पञ्च॑चमे॒पञ्च॑
चमेस॒प्तच॑मेस॒प्तच॑मे॒नव॑चमे॒नव॑चम ऽ एका॑दशचम॒ऽएका॑दशचमे॒त्र
यो॑दशचमे॒त्र॒यो॑दशचमे॒पञ्च॑दशचमे॒पञ्च॑दशचमेस॒प्तद॑शचमेस॒प्तद॑
शचमे॒नव॑दशचमे॒नव॑दशचम॒ऽएक॑विꣳशतिश्चम॒ऽएक॑विꣳशतिश्चमे
त्रयो॑विꣳशतिश्चमे॒त्र॒यो॑विꣳशतिश्चमे॒पञ्च॑विꣳशतिश्चमे॒पञ्च॑विꣳ
शतिश्चमेस॒प्तवि॑ꣳशतिश्चमेस॒प्तवि॑ꣳशतिश्चमे॒नव॑विꣳशतिश्चमे॒ नव॑
विꣳशतिश्चम॒ऽएक॑त्रिꣳशच्चमे॒ऽएक॑त्रिꣳशच्चमे॒त्र॒य॑स्त्रिꣳशच्चमे य॒ज्ञेन॑
कल्पन्ताम् ॥२४॥ चत॑स्रश्च । मे॒ष्टौच॑मे॒ष्टौच॑मे॒द्वा॒द॑शचमे॒द्वा॒द॑शचमे
षो॑ड॑शचमे॒षो॑ड॑शचमे॒विꣳश॒तिश्च॑मे॒विꣳश॒तिश्च॑मे॒ चतु॑र्विꣳशतिश्चमे

चतुर्व्विꣳशतिश्च मेष्टाविꣳशतिश्च मेष्टाविꣳशतिश्च मेद्वात्रिꣳशच्च मेद्वात्रिꣳशच्च मेषट्त्रिꣳशच्च मेषट्त्रिꣳशच्च मेचत्वारिꣳशच्च मेचत्वारिꣳशच्च मेचतुश्चत्वारिꣳशच्च मेचतुश्चत्वारिꣳशच्च मेष्टाचत्वारिꣳशच्च मेष्टाचत्वारिꣳशच्च मेयज्ञेन कल्पन्ताम् ॥२५॥ त्र्यविꣳश्च । मेत्र्यवीच्च मेदित्यवाट्च मेदित्यौही च मेपञ्चाविꣳश्च मेपञ्चावी च मेत्रिवत्सश्च मेत्रिवत्सा च मेतुर्यवाट्च मेतुर्यौही च मेयज्ञेन कल्पन्ताम् ॥२६॥ पष्ठवाट्च । मे पष्ठौही च मऽउक्षा च मेव्वशा च मऽऋषभश्च मेव्वेहच्च मेनड्वाँश्च मेधेनु श्च मेयज्ञेन कल्पन्ताम् ॥२७॥ (न.)व्वाजाय स्वाहा । प्रसवाय स्वाहा पिजाय स्वाहा क्रतवे स्वाहा व्वसवे स्वाहा हर्पतये स्वाहान्हे मुग्धाय स्वा

हामुग्गधायव्वैनꣳशिनायस्वाहाव्विनꣳशिनंऽआन्त्यायनायस्वाहा न्त्यायभौवनायस्वाहा भुवनस्यपतयेस्वाहाधिपतयेस्वाहाप्प्रजापतये स्वाहा॥ इयन्तेराण्मित्रायंयन्तासिसमंनऽऊर्ज्जेत्वाव्वृष्ट्यैत्वाप्प्र जानान्त्वाधिपत्याय॥२८॥ आयुर्य्यज्ञेन। कल्पताम्प्राणोयज्ञेनकल्प ताञ्चक्षुर्य्यज्ञेनकल्पताꣳश्श्रोत्रंयज्ञेनकल्पताम्वाग्यज्ञेनकल्पताम्म नोयज्ञेनकल्पताम्मात्त्मायज्ञेनकल्पताम्ब्रह्मायज्ञेनकल्पताङ्ज्योतिर्य ज्ञेनकल्पताꣳ स्वर्य्यज्ञेनकल्पताम्पृष्ठंयज्ञेनकल्पतांयज्ञोयज्ञेनकल्प ताम्॥ स्तोमश्चयजुश्श्चऽऋक्चसामचबृहच्चरथन्तरञ्च॥ स्वर्द्देवाऽअ गन्मामृताऽअभूमप्प्रजापतेंप्प्रजाऽअभूमव्वेट्स्वाहा॥२९॥ इति॥

हरिः ॐ ऋचं॒व्वाच॒म्प्रप॑द्ये॒मनो॒यजुः॒प्प्रप॑द्ये॒साम॑प्प्रा॒णम्प्रप॑द्ये॒चक्षुः॒श्रोत्रं॒प्रप॑द्ये ॥ व्वागोज॑ः स॒हौजो॒मयि॑प्प्राणापा॒नौ ॥ १ ॥ यन्न्मे॑छि॒द्रञ्चक्षु॑षो॒हृद॑य॒स्यमन॑सो॒व्वातितृण्ण॒म्बृह॒स्पति॑र्म्मे॒तद्द॑धातु ॥ शन्नो॑भवतु॒भुव॑नस्य॒यस्पति॑ः ॥ २ ॥ भूर्भुव॒ः स्व॒ः । तत्त्स॑वि॒तुर्व्वरे॑ण्य॒म्भर्ग्गो॑दे॒वस्य॑धीमहि ॥ धियो॒योन॑ः प्रचो॒दया॑त् ॥३॥ कया॑न । श्चि॒त्रऽआभु॑वदू॒तीस॒दावृ॑धः॒सखा॑ ॥ कया॒शचि॑ष्ठयाव्वता॥४॥ कस्त्वा॑ । स॒त्योमदा॑ना॒म्मꣳहि॑ष्ठोमत्स॒दन्ध॑सः ॥ दृ॒ढाचि॑दा॒रुजे॒व्वसु॑ ॥५॥ अ॒भीषुण॒ः ॥ सखी॑नामवि॒ताज॑रितॄ॒णाम् ॥ श॒तम्भ॑वास्यू॒तिभि॑ः ॥ ६ ॥ कया॒त्वन्न॑ऽऊ॒त्त्याभिप्प्रम॑न्दसेव्वृषन् ॥ कया॑स्तो॒तृ

ब्भ्यऽआभर ॥ ७ ॥ इन्द्रोविश्वस्यराजति ॥ शन्नोऽअस्तुद्विपदे शञ्चतुष्पदे ॥ ८ ॥ शन्नोमित्रःशंवरुणःशन्नोभवत्वर्य्यमा ॥ शन्नऽ इन्द्रोबृहस्पतिः शन्नोविष्णुरुरुक्रमः ॥ ९ ॥ शन्नोव्वातः पवताःशन्नस्तपतुसूर्य्यः ॥ शन्नःकनिक्रददेवःपर्ज्जन्योऽअभिवर्षतु ॥१०॥ अहानिशम्भवन्तुनःशंरात्रीःप्रतिधीयताम् ॥ शन्नऽ इन्द्राग्नीभवताम्वोभिःशन्नऽइन्द्रावरुणारातहव्या ॥ शन्नऽइन्द्रा पूषणाव्वाजसातौशमिन्द्रासोमासुवितायशंस्योः ॥११॥ शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये ॥ शंयोरभिस्रवन्तुनः ॥ १२ ॥ स्योना पृथिविनोभवानृक्षरानिवेशनी ॥ यच्छानःशर्म्मसप्रथाः ॥ १३ ॥

आपो॒हिष्ठाम॑यो॒भुव॒स्तान॑ऽऊ॒र्ज्जेद॑धातन ॥ म॒हेरणा॑य॒चक्ष॑से ॥१४॥
योव॑ ÷ शि॒वत॑मो॒रस॒स्तस्य॑भाजयते॒हन॑ ÷ ॥ उ॒श॒तीरि॑वमा॒तर॑ ÷
॥ १५ ॥ तस्म्मा॒ऽअर॑ङ्गमामवो॒यस्य॒क्षया॑य॒जिन्न्व॑थ ॥ आपो॑ज॒न
य॑थाचनः ॥१६॥ द्यौःशान्ति॑र॒न्तरि॑क्ष॒ꣳशान्ति॑ ÷ पृथि॒वीशान्ति॒रा
प॒ꣳशान्ति॒रोष॑धय॒ꣳशान्ति॑ ÷ ॥ व्वन॒स्प्पत॑य॒ꣳशान्ति॒र्व्विश्वे॑दे॒वाःशा
न्ति॒र्ब्रह्म॒शान्ति॒ꣳसर्व्व॒ꣳशान्ति॒ꣳ शान्ति॑रे॒वशान्ति॒ꣳ सामा॒शान्ति॑रेधि
॥१७॥ दृते॒दृꣳह॑मामि॒त्त्रस्य॑मा॒चक्षु॑षा॒सर्व्वा॑णिभू॒तानि॒समी॑क्षन्ताम्॥
मि॒त्त्रस्या॒हञ्चक्षु॑षा॒सर्व्वा॑णिभू॒तानि॒समी॑क्षे॥ मि॒त्त्रस्य॒चक्षु॑षा॒समी॑क्षा
महे ॥१८॥ दृते॒दृꣳह॑मा। ज्योक्ते॑सन्दृशि॑जीव्व्यास॒ञ्ज्योक्ते॑सन्दृशिजी

व्यासम् ॥१९॥ नमस्ते। हरसेशोचिषेनमस्तेऽअस्त्वर्चिषे॥ अन्याँ स्तेऽअस्मत्तपन्तुहेतयः÷ पावकोऽअस्मभ्यꣳशिवोभव ॥ २० ॥ नमस्ते। अस्तुविद्युतेनमस्तेस्तनयित्नवे॥ नमस्तेभगवन्नस्तुयत्स्व÷ समीहसे ॥२१॥ यतोयत्समीहसेततोनोऽअभयङ्कुरु॥ शन्न÷ कुरु प्रजाभ्योभयन्नःपशुभ्यः÷ ॥२२॥ सुमित्रियान्नऽआपऽओषधयःसन्तुदुर्मित्रियास्तस्मैसन्तुयोस्मान्द्वेष्टियंवयंद्विष्मः ॥ २३ ॥ तच्चक्षुर्देवहितम्पुरस्ताच्छुक्रमुच्चरत् ॥ पश्येमशरदः÷ शतञ्जीवेमशरदः÷ शतꣳशृणुयामशरदः÷ शतम्प्रब्रवामशरदः÷ शतमदीनास्याम शरदः÷ शतम्भूयश्चशरदः÷ शतात् ॥२४॥ इति शान्त्यध्यायः ॥

(ॐ साम्बसदाशिवोम् । ततः शम्भोरुत्तराङ्गपूजां विधाय कलशाभिषेकजलाभ्यां यजमानं सपरिजनमभिषिञ्चेयुः—)

हरिः ॐ स्व॒स्तिन॒ऽइन्द्रो॑व्वृ॒द्धश्र॑वाः स्व॒स्तिन॑ ÷ पू॒षाव्वि॒श्ववे॑दाः ॥ स्व॒स्तिन॒स्तार्क्ष्यो॒ऽअरि॑ष्टनेमिः स्व॒स्तिनो॒बृह॒स्पति॑र्द्दधातु ॥१॥ पय॑ ÷ पृथि॒व्याम्पय॒ऽओष॑धीषु॒पयो॑दि॒व्यु॒न्तरि॑क्षे॒पयो॑धाः ॥ पय॑स्वतीः प्र॒दिश॑ ÷ सन्तु॒मह्य॑म् ॥२॥ विष्णो॑र॒राट॑मसि॒व्विष्णो॒ः श्नप्त्रे॑स्थो॒व्विष्णो॒ः स्यूर॑सि॒विष्णो॑ध्रु॒वो॒सि ॥ वै॒ष्ण॒वम॑सि॒व्विष्ण॑वेत्त्वा ॥३॥ अ॒ग्निर्दे॒वता॒व्वातो॑दे॒वता॒सूर्यो॑दे॒वता॑च॒न्द्रमा॑दे॒वता॒व्वस॑वो दे॒वता॑रु॒द्रादे॒वता॑दि॒त्यादे॒वता॑म॒रुतो॑दे॒वता॒व्विश्वे॑दे॒वादे॒वता॒बृह॒स्पति॑र्दे॒वतेन्द्रो॑दे॒

यत्राग्वरुणोदेवता ॥ ४ ॥ (द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः ॥ वनस्पतयः शान्तिर्विश्वे देवाः शान्तिर्ब्रह्म शान्तिः सर्वꣳ शान्तिः शान्तिरेव शान्तिः सामा शान्तिरेधि ॥१॥ तच्चक्षुर्देवहितम्पुरस्ताच्छुक्रमुच्चरत् ॥ पश्येम शरदः शतञ्जीवेम शरदः शतꣳ शृणुयाम शरदः शतम्प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतम्भूयश्च शरदः शतात् ॥ २ ॥ विश्वानि देव सवितर्दुरितानि परासुव ॥ यद्भद्रन्तन्न आसुव ॥३॥ त्र्यम्बकंयजामहे सुगन्धिम्पुष्टिवर्द्धनम् ॥ उर्व्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात् ॥ ४ ॥) सद्योजातम्प्रपद्यामि सद्योजाताय वै

नमोनमः ॥ भवेभवेनातिभवेभवस्वमांभवोद्भवायनमः ॥ ५ ॥
वनमदेवायनमोज्येष्ठायनमः श्रेष्ठायनमोरुद्रायनमः कालायनमः
कलविकरणायनमो बलविकरणायनमो बलायनमो बलप्रमथनाय
नमः सर्व्वभूतदमनायनमोमनोन्मनायनमः ॥ ६ ॥ अघोरेभ्योथ घो
घोरेभ्योघोरघोरतरेभ्यः ॥ सर्व्वेभ्यःसर्व्वशर्व्वेभ्योनमस्तेऽअस्तु
रुद्ररूपेभ्यः ॥ ७ ॥ तत्पुरुषायविद्महेमहादेवायधीमहि ॥ तन्नो
रुद्रःप्रचोदयात् ॥८॥ ईशानःसर्व्वविद्यानामीश्वरःसर्व्वभूतानाम् ॥
ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्मशिवोमेऽअस्तुसदाशिवोम् ॥ ९ ॥
ॐ शिवोनामासिस्वधितिस्तेपितानमस्तेऽअस्तुमामाहिꣳ सीः ॥

निर्वर्त्तयाम्यायुषेन्नाद्यायप्रजननायरायस्पोषायसुप्रजास्त्वायसु
वीर्यायः॥१०॥ विश्वानिदेवसवितर्दुरितानिपरासुव ॥ यद्भद्रन्तन्नऽ
आसुव॥११॥ ॐ द्यौः शान्तिरन्तरिक्षꣳशान्तिः÷ पृथिवीशान्तिरापः
शान्तिरोषधयꣳशान्तिः÷ ॥ वनस्पतयꣳशान्तिर्विश्वेदेवाः शान्ति
र्ब्रह्मशान्तिꣳसर्व्वꣳशान्तिꣳशान्तिरेवशान्तिꣳसामाशान्तिरेधि॥१२॥
ॐ सर्व्वेषांवाऽएषवेदानाꣳरसोयत्सामसर्व्वेषामेवैनमेतद्वेदाना
ꣳरसेनाभिषिञ्चति ॥१३॥ ॐ शान्तिः शान्तिः शान्तिः सुशान्ति-
र्भवतु सर्वारिष्टशान्तिर्भवतु ॥ ॐ अमृताभिषेकोऽस्तु ॥ इति ॥

पूर्वोक्तषडङ्गन्यासं कुर्यात्। उत्तराङ्गपूजां विधाय पुष्पाञ्जलिः—

ॐ यज्ञेनयज्ञमयजन्तदेवास्तानिधर्म्माणिप्रथमान्यासन् । तेह नाकंम्महिमानः सचन्तयत्रपूर्व्वेसाद्ध्याःसन्तिदेवाः ॥ ॐराजाधिराजायप्रसह्यसाहिने । नमोवयंवैश्रवणायकुर्महे । समेकामान्कामकामायमह्यम् । कामेश्वरोवैश्रवणोददातु । कुबेरायवैश्रवणाय । महाराजायनमः । ॐ स्वस्ति । साम्राज्यंभौज्यंस्वाराज्यंवैराज्यं पारमेष्ठ्यं राज्यंमाहाराज्यमाधिपत्यमयंसमन्तपर्यायीस्यात्सार्वभौमःसार्वायुषआन्तादापरार्धात् । पृथिव्यैसमुद्रपर्यन्तायाएकराडिति तदप्येषश्लोकोभिगीतोमरुतःपरिवेष्टारोमरुत्तस्यावसन्गृहे । आविक्षितस्य कामप्रेर्विश्वेदेवाःसभासद इति ॥

ॐ विश्वतश्चक्षुरुतविश्वतोमुखोविश्वतोबाहुरुतविश्वतस्पात् ।
सम्बाहुभ्यान्धमतिसम्पतत्रैर्द्यावाभूमीजनयन्देवऽएकः ॥ १॥
तत्पुरुषाय विद्महे महादेवाय धीमहि ॥ तन्नो रुद्रः प्रचोदयात् ॥२॥
पुष्पादिकमादाय—ॐ आब्रह्मन्ब्राह्मणोब्रह्मवर्चसीजायतामाराष्ट्रे
राजन्यः शूरऽइषव्योतिव्याधीमहारथोजायतान्दोग्ध्रीधेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषाजिष्णूरथेष्ठाः सभेयोयुवास्य
यजमानस्यवीरोजायतान्निकामेनिकामेनः पर्जन्योवर्षतुफलवत्यो
नऽओषधयःपच्यन्तांयोगक्षेमोनः कल्पताम् ॥ १ ॥ आयुष्यं
वर्चस्यꣳरायस्पोषमौद्भिदम् ॥ इदꣳहिरण्यंवर्चस्वज्जैत्रायाविश

तादु॒माम् ॥२॥ नतद्रक्षा॑ꣳसि॒नपि॑शा॒चास्त॑रन्तिदे॒वाना॒मोज॑ः प्र
थम॒जꣳह्ये॒तत् ॥ योबि॒भर्ति॑दाक्षाय॒णꣳहिर॑ण्य॒ꣳसदे॒वेषु॑कृणुतेदी॒र्घ
मायुः॒सम॑नु॒ष्ये॒षुकृणुतेदी॒र्घमायु॑ः ॥३॥ दी॒र्घायु॑स्तऽओषधेखनि॒
तायस्मै॑चत्वा॒खना॑म्यहम् ॥ अथो॒त्वन्दी॒र्घायु॑र्भू॒त्वाश॒तव॑ल्शा॒व्विरो॑ह
तात् ॥ ४ ॥ पुन॑स्त्वादि॒त्यारु॒द्राव॑सवः॒समि॑न्धता॒म्पुन॑र्ब्र॒ह्माणो॑वसु
नीथय॒ज्ञैः ॥ घृते॒नत्वंतन्वं॒ वर्धयस्वस॒त्याः स॑न्तु॒यज॑मानस्य॒कामा॑ः
॥५॥ मन॑स॒ःकाम॒माकू॑तिंवा॒चः स॒त्यम॑शीय ॥ प॒शू॒नाꣳरू॒पमन्न॑
स्य॒रसो॒यश॒ः श्रीः श्र॒यताम् ॥६॥ अग्ने॒प्रेहि॑प्रथ॒मोदे॑वय॒ताञ्चक्षु॑र्दे॒
वाना॑मु॒तमर्त्या॑नाम् ॥ इय॑क्षमाणा॒भृगु॑भिः॒सजोषा॒ःस्व॒र्य्यन्तु॒यज॑मा

नोऽस्वस्ति ॥७॥ पुष्पादिकं यजमानाय प्रदाय रक्षासूत्रं बध्नीयात् ।
ॐ त्वंयविष्ठदाशुषोनॅःपाहिशृणुधीगिरः ॥ रक्षातोकमुतत्मना ॥
येन बद्धो बलीराजा दानवेन्द्रो महाबलः ॥ तेन त्वामपि बध्नामि
रक्षे मा चल मा चल ॥ अनेन पूजनपूर्वकरुद्राभिषेककर्मणा कृतेन
श्रीभवानीशङ्करमहारुद्रः प्रीयतां न मम ॥ ॐसदाशिवार्पणमस्तु ॥

सप्तशती प्रारम्भः

श्रीगणेशाय नमः ॥ अथ पुस्तके सरस्वतीपूजनम् ॥ ॐ नमः पिशाचनिकरङ्किनि त्रिशूलखड्गहस्ते सिंहारूढे एह्येहि आगच्छ आगच्छ इमां पूजां गृह्ण गृह्ण स्वाहा । श्रीसप्तशतीसरस्वत्यै नमः आवाहयामि । ततः ॐ ऱ्हीं चण्डिकायै नमः इति मन्त्रेण षोडशोपचारैः पूजयेदिति। अथ शापोद्धारमन्त्रः—ॐ ऱ्हीं क्लीं श्रीं क्रां क्रीं चण्डिके देवि शापानुग्रहं कुरु कुरु स्वाहा ७ वारं जपेत् ॥ तत उत्कीलनमन्त्रः—ॐ श्रीं क्लीं ऱ्हीं सप्तशति चण्डिके उत्कीलनं कुरु कुरु स्वाहा—२१ वारं जपेत् ॥

अथ कवचम् ॥ श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ श्रीगुरुभ्यो नमः ॥ श्रीकुलदेवतायै नमः ॥ अविघ्नमस्तु ॥ ॐ नारायणाय नमः ॥ ॐ नराय नरोत्तमाय नमः ॥ ॐ सरस्वती-देव्यै नमः ॥ ॐ वेदव्यासाय नमः ॥ ॐ नमश्चण्डिकायै ॥ ॐ मार्कण्डेय उवाच ॥ यद्गुह्यमित्यादि षट्पञ्चाशत् ५६ श्लोकात्मकं कवचं पठित्वा ॐ जयन्तीत्यादि पञ्चविंशतिश्लोकात्मकार्गलां च पठित्वा ॐ विशुद्धेत्यादिचतुर्दशश्लोकात्मकं कीलकं पठेत् । ॐ अस्य श्रीचण्डीकवचस्य ब्रह्मा ऋषिः अनुष्टुप्छन्दः चामुण्डा देवता अङ्गन्यासोक्तमातरो बीजं दिग्बन्धदेवतास्तत्त्वं श्रीजग-दम्बाप्रीत्यर्थे दुर्गाकवचपाठजपे विनियोगः ॥

ॐ नमश्चण्डिकायै ॥ मार्कण्डेय उवाच ॥ ॐ यद्गुह्यं परमं लोके सर्वरक्षाकरं नृणाम् ॥ यन्न कस्यचिदाख्यातं तन्मे ब्रूहि पितामह ॥१॥ ब्रह्मोवाच । अस्ति गुह्यतमं विप्र सर्वभूतोपकारकम् । देव्यास्तु कवचं पुण्यं तच्छृणुष्व महामुने ॥२॥ प्रथमं शैलपुत्रीति द्वितीयं ब्रह्मचारिणी ॥ तृतीयं चन्द्रघण्टेति कूष्माण्डेति चतुर्थकम् ॥३॥ पञ्चमं स्कन्दमातेति षष्ठं कात्यायनीति च ॥ सप्तमं कालरात्रिश्च महागौरीति चाष्टमम् ॥४॥ नवमं सिद्धिदात्री च नवदुर्गाः प्रकीर्तिताः ॥ उक्तान्येतानि नामानि ब्रह्मणैव महात्मना ॥५॥ अग्निना दह्यमानस्तु शत्रुमध्ये गतो रणे ॥ विषमे दुर्गमे चैव भयार्ताः शरणं गताः ॥६॥ न तेषां जायते किञ्चिदशुभं रणसङ्कटे ॥ नापदं

तस्य पश्यामि शोकदुःखभयं न हि ॥७॥ यैस्तु भक्त्या स्मृता नूनं तेषां सिद्धिः प्रजायते ॥ ये त्वां स्मरन्ति देवेशि रक्षसे तान्न संशयः ॥८॥ प्रेतसंस्था तु चामुण्डा वाराही महिषासना ॥ ऐन्द्री गजसमारूढा वैष्णवी गरुडासना ॥९॥ माहेश्वरी वृषारूढा कौमारी शिखिवाहना ॥ लक्ष्मीः पद्मासना देवी पद्महस्ता हरिप्रिया ॥ १० ॥ श्वेतरूपधरा देवी ईश्वरी वृषवाहना ॥ ब्राह्मी हंससमारूढा सर्वाभरणभूषिताः ॥११॥ इत्येता मातरः सर्वाः सर्वयोगसमन्विताः ॥ नानाभरणशोभाढ्या नानारत्नोपशोभिताः ॥१२॥ दृश्यन्ते रथमारूढा देव्यः क्रोधसमाकुलाः ॥ शङ्खं चक्रं गदां शक्तिं हलञ्च मुसलायुधम् ॥ १३ ॥ खेटकं तोमरञ्चैव परशुं पाशमेव च ॥

कुन्तायुधं त्रिशूलञ्च शार्ङ्गमायुधमुत्तमम् ॥ १४ ॥ दैत्यानां देह-
नाशाय भक्तानामभयाय च ॥ धारयन्त्यायुधानीत्थं देवानां च
हिताय वै ॥१५॥ नमस्तेऽस्तु महारौद्रे महाघोरपराक्रमे ॥ महा-
बले महोत्साहे महाभयविनाशिनि ॥१६॥ त्राहि मां देवि दुष्प्रेक्ष्ये
शत्रूणां भयवर्धिनि ॥ प्राच्यां रक्षतु मामैन्द्री आग्नेय्यामग्निदेवता
॥ १७ ॥ दक्षिणेऽवतु वाराही नैर्ऋत्यां खड्गधारिणी ॥ प्रतीच्यां
वारुणी रक्षेद् वायव्यां मृगवाहिनी ॥१८॥ उदीच्यां रक्ष कौबेरी
ऐशान्यां शूलधारिणी ॥ ऊर्ध्वं ब्रह्माणि मे रक्षेदधस्ताद्वैष्णवी तथा
॥१९॥ एवं दश दिशो रक्षेच्चामुण्डा [illegible]वाहना ॥ जया मे चाग्रतः
पातु विजया पातु पृष्ठतः ॥ २० ॥ अजिता वामपार्श्वे तु दक्षिणे

चापराजिता ॥ शिखां मे द्योतिनी रक्षेदुमा मूर्ध्नि व्यवस्थिता ॥२१॥ मालाधरी ललाटे च भ्रुवौ रक्षेद् यशस्विनी ॥ त्रिनेत्रा च भ्रुवोर्मध्ये यमघण्टा च नासिके ॥ २२ ॥ शङ्खिनी चक्षुषोर्मध्ये श्रोत्रयोर्द्वारवासिनी ॥ कपोलौ कालिका रक्षेत् कर्णमूले तु शाङ्करी ॥ २३ ॥ नासिकायां सुगन्धा च उत्तरोष्ठे च चर्चिका ॥ अधरे चामृतकला जिह्वायां च सरस्वती ॥२४॥ दन्तान् रक्षतु कौमारी कण्ठमध्ये तु चण्डिका ॥ घण्टिकां चित्रघण्टा च महामाया च तालुके ॥२५॥ कामाक्षी चिबुकं रक्षेद्वाचं मे सर्वमङ्गला ॥ ग्रीवायां भद्रकाली च पृष्ठवंशे धनुर्धरी ॥२६॥ नीलग्रीवा बहिःकण्ठे नलिकां नलकूबरी ॥ स्कन्धयोः खड्गिनी रक्षेद् बाहू मे वज्रधारिणी ॥२७॥

हस्तयोर्दण्डिनी रक्षेदम्बिका चाङ्गुलीस्तथा ॥ नखाञ्छूलेश्वरी रक्षेत् कुक्षौ रक्षेन्नलेश्वरी ॥२८॥ स्तनौ रक्षेन्महालक्ष्मीर्मनश्शोकविनाशिनी ॥ हृदये ललितादेवी उदरे शूलधारिणी ॥२९॥ नाभौ च कामिनी रक्षेद् गुह्यं गुह्येश्वरी तथा ॥ पूतना कामिका मेढ्रं गुदे महिषवाहिनी ॥३०॥ कट्यां भगवतीरक्षेज्जानुनी विन्ध्यवासिनी ॥ जङ्घे महाबला रक्षेत् सर्वकामप्रदायिनी ॥३१॥ गुल्फयोर्नारसिंही च पादपृष्ठे तु तैजसी ॥ पादाङ्गुलीषु श्री रक्षेत् पादाधस्तलवासिनी ॥३२॥ नखान् दंष्ट्राकराली च केशांश्चैवोर्ध्वकेशिनी॥ रोमकूपेषु कौबेरी त्वचं वागीश्वरी तथा ॥ ३३ ॥ रक्तमज्जावसामांसान्यस्थिमेदांसि पार्वती ॥ अन्त्राणि कालरात्रिश्च पित्तं च

मुकुटेश्वरी ॥ ३४ ॥ पद्मावती पद्मकोशे कफे चूडामणिस्तथा ॥ ज्वालामुखी नखज्वालामभेद्या सर्वसन्धिषु ॥३५॥ शुक्रं ब्रह्माणि मे रक्षेच्छायां छत्रेश्वरी तथा ॥ अहङ्कारं मनो बुद्धिं रक्षेन्मे धर्मधारिणी ॥३६॥ प्राणापानौ तथा व्यानमुदानं च समानकम् ॥ वज्रहस्ता च मे रक्षेत् प्राणं कल्याणशोभना ॥३७॥ रसे रूपे च गन्धे च शब्दे स्पर्शे च योगिनी ॥ सत्वं रजस्तमश्चैव रक्षेन्नारायणी सदा ॥ ३८ ॥ आयू रक्षतु वाराही धर्मं रक्षतु वैष्णवी ॥ यशः कीर्तिं च लक्ष्मीं च धनं विद्यां च चक्रिणी ॥३९॥ गोत्रमिन्द्राणि मे रक्षेत् पशून् मे रक्ष चण्डिके ॥ पुत्रान् रक्षेन्महालक्ष्मीर्भार्यां रक्षतु भैरवी ॥४०॥ पन्थानं सुपथा रक्षेन्मार्गं क्षेम-

करी तथा ॥ राजद्वारे महालक्ष्मीर्विजया सर्वतः स्थिता ॥४१॥ रक्षाहीनं तु यत्स्थान वर्जितं कवचेन तु ॥ तत्सर्वं रक्ष मे देवी जयन्ती पापनाशिनी ॥४२॥ पदमेकं नगच्छेत् तु यदीच्छेच्छुभमात्मनः ॥ कवचेनावृतो नित्यं यत्र यत्रैव गच्छति ॥४३॥ तत्र तत्रार्थलाभश्च विजयः सार्वकामिकः ॥ यं यं चिन्तयते कामं तं तं प्राप्नोति निश्चितम् ॥ ४४ ॥ परमैश्वर्यमतुलं प्राप्स्यते भूतले पुमान् ॥ निर्भयो जायते मर्त्यः सङ्ग्रामेष्वपराजितः ॥ ४५ ॥ त्रैलोक्ये तु भवेत् पूज्यः कवचेनावृतः पुमान् ॥ इदं तु देव्याः कवचं देवानामपि दुर्लभम् ॥४६॥ यः पठेत् प्रयतो नित्यं त्रिसन्ध्यं श्रद्धयान्वितः ॥ दैवीकला भवेत् तस्य त्रैलोक्येष्वपराजितः ॥४७॥

जीवेद् वर्षशतं साग्रमपमृत्युविवर्जितः ॥ नश्यन्ति व्याधयः सर्वे लूताविस्फोटकादयः ॥ ४८ ॥ स्थावरं जङ्गमं चैव कृत्रिमं चापि यद् विषम् ॥ अभिचाराणि सर्वाणि मन्त्रयन्त्राणि भूतले ॥४९॥ भूचराः खेचराश्चैव जलजाश्चोपदेशिकाः ॥ सहजाः कुलजा माला डाकिनी शाकिनी तथा ॥ ५० ॥ अन्तरिक्षचरा घोरा डाकिन्यश्च महाबलाः ॥ ग्रहभूतपिशाचाश्च यक्षगन्धर्वराक्षसाः ॥५१॥ ब्रह्मराक्षसवेतालाः कूष्माण्डा भैरवादयः ॥ नश्यन्ति दर्शनात् तस्य कवचे हृदि संस्थिते ॥ ५२ ॥ मानोन्नतिर्भवेद् राज्ञस्तेजो वृद्धिकरं परम् ॥ यशसा वर्धते सोऽपि कीर्तिमण्डितभूतले ॥ ५३ ॥ जपेत् सप्तशतीं चण्डीं कृत्वा तु कवचं पुरा ॥ यावद् भूमण्डलं धत्ते

सशैलवनकानम् ॥ ५४ ॥ तावत् तिष्ठति मेदिन्यां सन्ततिः पुत्र-पौत्रिकी ॥ देहान्ते परमं स्थानं यत्सुरैरपि दुर्लभम् ॥ ५५ ॥ प्राप्नोति पुरुषो नित्यं महामायाप्रसादतः ॥ लभते परमं रूपं शिवेन सह मोदते ॥५६॥ इति वाराहपुराणे हरिहरब्रह्मविरचितं देव्याः कवचं समाप्तम् ॥

अथार्गलास्तोत्रम् ॥ ॐ अस्य श्रीअर्गलास्तोत्रमन्त्रस्य विष्णुऋषिः अनुष्टुप्छन्दः श्रीमहालक्ष्मीर्देवता श्रीजगदम्बाप्रीतये अर्गलास्तोत्रपाठजपे विनियोगः॥ ॐ नमश्चण्डिकायै—

जयन्ती मङ्गला काली भद्रकाली कपालिनी ॥
दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तु ते ॥१॥

जय त्वं देवि चामुण्डे जयभूतार्तिहारिणि ॥
जय सर्वगते देवि कालरात्रि नमोऽस्तु ते ॥ २ ॥
मधुकैटभविद्रावि विधातृवरदे नमः ॥
रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ ३ ॥
महिषासुरनिर्णाशि भक्तानां सुखदे नमः ॥ रूपं देहि० ॥४॥
रक्तबीजवधे देवि चण्डमुण्डविनाशिनि ॥ रूपं देहि० ॥५॥
शुम्भस्यैव निशुम्भस्य धूम्राक्षस्य च मर्दिनि ॥ रूपं देहि० ॥६॥
वन्दिताङ्घ्रियुगे देवि सर्वसौभाग्यदायिनि ॥ रूपं देहि० ॥७॥
अचिन्त्यरूपचरिते सर्वशत्रुविनाशिनी ॥ रूपं देहि० ॥८॥
नतेभ्यः सर्वदा भक्त्या चण्डिके दुरितापहे ॥ रूपं देहि० ॥९॥

स्तुवद्भ्यो भक्तिपूर्वं त्वां चण्डिके व्याधिनाशिनी॥ रूपं देहि० ॥१०॥
चण्डिके सततं ये त्वामर्चयन्तीह भक्तितः ॥ रूपं देहि० ॥११॥
देहि सौभाग्यमारोग्यं देहि देवि परं सुखम् ॥ रूपं देहि० ॥१२॥
विधेहि द्विषतां नाशं विधेहि बलमुच्चकैः ॥ रूपं देहि० ॥१३॥
विधेहि देवि कल्याणं विधेहि परमां श्रियम् ॥ रूपं देहि० ॥१४॥
सुरासुर - शिरो - रत्न-निघृष्ट - चरणेऽम्बिके ॥ रूपं देहि० ॥१५॥
विद्यावन्तं यशस्वन्तं लक्ष्मीवन्तं जनं कुरु ॥ रूपं देहि० ॥१६॥
प्रचण्डदैत्यदर्पघ्ने चण्डिके प्रणताय मे ॥ रूपं देहि० ॥१७॥
चतुर्भुजे चतुर्वक्त्रे संस्तुते परमेश्वरि ॥ रूपं देहि० ॥१८॥
कृष्णेन संस्तुते देवि शश्वद्भक्त्या त्वमम्बिके ॥ रूपं देहि० ॥१९॥

हिमाचल - सुता - नाथ - संस्तुते परमेश्वरि ॥ रूपं देहि० ॥२०॥
इन्द्राणी - पति - सद्भाव - पूजिते परमेश्वरि ॥ रूपं देहि० ॥२१॥
देवि प्रचण्डदोर्दण्ड दैत्यदर्पविनाशिनि ॥ रूपं देहि० ॥२२॥
देवि भक्त - जनोद्दाम - दत्तानन्दोदयेऽम्बिके ॥ रूपं देहि० ॥२३॥
पत्नीं मनोरमां देहि मनोवृत्तानुसारिणीम् ॥
तारिणीं दुर्गसंसारसागरस्य कुलोद्भवाम् ॥२४॥
इदं स्तोत्रं पठित्वा तु महास्तोत्रं पठेन्नरः ॥
स तु सप्तशतीसङ्ख्यावरमाप्नोति सम्पदाम् ॥२५॥
इति मार्कण्डेयपुराणे अर्गलास्तोत्रम् ॥

—:०:—

अथ कीलकम् ॥ ॐ अस्य श्रीकीलकमन्त्रस्य शिव ऋषिः अनुष्टुप् छन्दः श्रीमहासरस्वती देवता श्रीजगदम्बाप्रीत्यर्थं कीलकपाठजपे विनियोगः ॥ ॐ नमश्चण्डिकायै ॥ मार्कण्डेय उवाच ॥ विशुद्धज्ञानदेहाय त्रिवेदीदिव्यचक्षुषे ॥ श्रेयःप्राप्ति निमित्ताय नमः सोमार्धधारिणे ॥१॥ सर्वमेतद्विना यस्तु मन्त्राणामपि कीलकम् ॥ सोऽपि क्षेममवाप्नोति सततं जाप्यतत्परः॥२॥ सिद्ध्यन्त्युच्चाटनादीनि वस्तूनि सकलान्यपि ॥ एतेन स्तुवतां नित्यं स्तोत्रमात्रेण सिद्ध्यति ॥ ३ ॥ न मन्त्रो नौषधं तत्र न किञ्चिदपि विद्यते ॥ विना जाप्येन सिद्ध्येत सर्वमुच्चाटनादिकम् ॥४॥ समग्राण्यपि सिद्ध्यन्ति लोकशङ्कामिमां हरः ॥ कृत्वा

निमन्त्रयामास सर्वमेवमिदं शुभम् ॥५॥ स्तोत्रं वै चण्डिकायास्तु तच्च गुह्यं चकार सः ॥ समाप्नोति च पुण्येन तां यथावन्नियन्त्रणाम् ॥६॥ सोऽपि क्षेममवाप्नोति सर्वमेव न संशयः ॥ कृष्णायां वा चतुर्दश्यामष्टम्यां वा समाहितः ॥७॥ ददाति प्रतिगृह्णाति नान्यथैषा प्रसीदति ॥ इत्थं रूपेण कीलेन महादेवेन कीलितम् ॥ ८ ॥ यो निष्कीलां विधायैनां नित्यं जपति सुस्फुटम् ॥ स सिद्धः सगणः सोऽपि गन्धर्वो जायते वने ॥९॥ न चैवाप्यटतस्तस्य भयं क्वापि हि जायते ॥ नाऽपमृत्युवशं याति मृतो मोक्षमवाप्नुयात् ॥१०॥ ज्ञात्वा प्रारभ्य कुर्वीत ह्यकुर्वाणो विनश्यति ॥ ततो ज्ञात्वैव सम्पन्नमिदं प्रारभ्यते बुधैः ॥ ११ ॥ सौभाग्यादि च यत्किञ्चिद्

दृश्यते ललनाजने ॥ तत्सर्वं त्वत्प्रसादेन तेन जाप्यमिदं शुभम् ॥१२॥ शनैस्तु जाप्यमानेऽस्मिंस्तोत्रे सम्पत्तिरुच्चकैः ॥ भवत्येव समग्रापि ततः प्रारभ्यमेव तत् ॥१३॥ ऐश्वर्यं यत्प्रसादेन सौभाग्यारोग्यसम्पदः ॥ शत्रुहानिः परो मोक्षः स्तूयते सा न किं जनैः ॥१४॥ भगवत्याः कीलकस्तोत्रं समाप्तम् ॥१४॥

ॐ अस्य श्रीनवार्णमन्त्रस्य ब्रह्मविष्णुरुद्रा ऋषयः गायत्र्युष्णिगनुष्टुब्छन्दांसि ॥ श्रीमहाकालीमहालक्ष्मीमहासरस्वत्यो देवताः नन्दाशाकम्भरीभीमाः शक्तयः। रक्तदन्तिकादुर्गाभ्रामर्यो बीजानि अग्निवायुसूर्यास्तत्त्वानि ॥ श्रीमहाकालीमहालक्ष्मीमहासरस्वती प्रीत्यर्थं जपे विनियोगः ॥ ब्रह्मविष्णुरुद्रऋषिभ्यो नमः शिरसि॥

गायत्र्युष्णिगनुष्टुप्छन्दोभ्यो नमो मुखे ॥ श्रीमहाकालीमहालक्ष्मीमहासरस्वती देवताभ्यो नमो हृदि ॥ नन्दाशाकम्भरीभीमाशक्तिभ्यो नमो दक्षिणस्तने ॥ रक्तदन्तिकादुर्गाभ्रामरीबीजेभ्यो नमो वामस्तने ॥ अग्निवायुसूर्यास्तत्त्वेभ्यो नमो नाभौ ॥ इति ऋष्यादिन्यासः ॥ मूलेन करौ संशोध्य ॥

अथैकादशन्यासाः ॥ तत्रादौ मातृकान्यासः ॥ सर्वत्रादौ प्रणवोच्चारः ॥ अंनमो ललाटे ॥ आंनमो मुखवृत्ते ॥ इंनमो दक्षिणनेत्रे ॥ ईंनमो वामनेत्रे ॥ उंनमो दक्षिणकर्णे ॥ ऊंनमो वामकर्णे ॥ ऋंनमो दक्षिणनासि ॥ ॠंनमो वामनासि ॥ लृंनमो दक्षिणगण्डे ॥ ॡंनमो वामगण्डे ॥ एंनमो ऊर्ध्वोष्ठे ॥ ऐंनमोऽधरोष्ठे ॥

ओंनम ऊर्ध्वदन्तपङ्क्तौ ॥ औंनमोऽधोदन्तपङ्क्तौ ॥ अं नमः शिरसि ॥ अःनमो मुखे ॥ कंनमो दक्षबाहुमूले ॥ खंनमो दक्षकूर्परे ॥ गंनमो दक्षमणिबन्धे ॥ घंनमो दक्षाङ्गुलिमूले ॥ ङंनमो दक्षाङ्गुल्यग्रे ॥ चंनमो वामबाहुमूले ॥ छंनमो वामकूर्परे ॥ जंनमो वाममणिबन्धे ॥ झंनमो वामाङ्गुलिमूले ॥ ञंनमो वामाङ्गुल्यग्रे ॥ टंनमो दक्षपादमूले ॥ ठंनमो दक्षजानुनि ॥ डंनमो दक्षगुल्फे ॥ ढंनमो दक्षपादाङ्गुलिमूले ॥ णंनमो दक्षपादाङ्गुल्यग्रे तंनमो वामपादमूले ॥ थंनमो वामजानुनि ॥ दंनमो वामगुल्फे । धंनमो वामपादाङ्गुलिमूले ॥ नंनमो वामपादाङ्गुल्यग्रे ॥ पंनमो दक्षपार्श्वे ॥ फंनमो वामपार्श्वे ॥ बंनमः पृष्ठे ॥ भंनमो नाभौ ॥

मंनमो जठरे ॥ यंनमो हृदि ॥ रंनमो दक्षांसे ॥ लंनमो ककुदि ॥ वंनमो वामांसे ॥ शंनमो हृदयादिदक्षहस्तान्ते ॥ षंनमो हृदादि वामहस्तान्ते ॥ संनमो हृदादिदक्षपादान्ते ॥ हंनमो हृदादिवाम-पादान्ते ॥ क्षंनमो जठरे ॥ त्रंनमो मुखे ॥ इति मातृकान्यासो देवसारूप्यप्रदः प्रथमः ॥१॥ ऐंह्रींक्लीं नमः कनिष्ठयोः ॥ ऐंह्रींक्लीं नमोऽनामिकयोः ॥ ऐंह्रींक्लीं नमो मध्यमयोः ॥ ऐंह्रींक्लीं नमः तर्जन्योः ॥ ऐंह्रींक्लीं नमोऽङ्गुष्ठयोः ॥ ऐंह्रींक्लीं नमः कर-मध्ये ॥ ऐंह्रींक्लीं नमः करपृष्ठे ॥ ऐंह्रींक्लीं नमो मणिबन्धयोः ॥ ऐंह्रींक्लीं नमः कूर्परयोः ॥ ऐंह्रींक्लींनमो हृदयाय नमः ॥ ऐंह्रींक्लीं नमः शिरसे स्वाहा ॥ ऐंह्रींक्लीं नमः शिखायै वषट् ॥ ऐंह्रींक्लीं

नमः कवचाय हुँ ॥ ऐंह्रींक्लीं नमो नेत्रत्रयाय वौषट् ॥ ऐंह्रींक्लीं नमोऽस्त्राय फट् ॥ इति सारस्वतो जाड्यविनाशको द्वितीयः ॥२॥ ह्रींब्राह्मी पूर्वस्यां मां पातु ॥ ह्रींमाहेश्वरी आग्नेय्यां मां पातु ॥ ह्रींकौमारी दक्षिणस्यां मां पातु ॥ ह्रींवैष्णवी नैर्ऋत्यां मां पातु ॥ ह्रींवाराही पश्चिमायां मां पातु ॥ ह्रींइन्द्राणी वायव्यां मां पातु ॥ ह्रींचामुण्डा उत्तरस्यां मां पातु ॥ ह्रींमहालक्ष्मीरैशान्यां मां पातु ॥ ह्रींव्योमेश्वरी ऊर्ध्वं मां पातु ॥ ह्रीं सप्तद्वीपेश्वरी भूमौ मां पातु ॥ ह्रींकामेश्वरी पाताले मां पातु ॥ इति मातृगणन्यासस्त्रैलोक्य-विजयप्रदस्तृतीयः ॥ ३ ॥ कमलाङ्कुशमण्डिता नन्दजा पूर्वाङ्गं मे पातु ॥ खड्गपात्रधरा रक्तदन्तिका दक्षिणाङ्गं मे पातु ॥ पुष्पपल्लव-

संयुता शाकम्भरी पश्चिमाङ्गं मे पातु॥ धनुर्बाणकरा दुर्गा वामाङ्गं मे पातु ॥ शिरः पात्रकरा भीमा मस्तकाच्चरणावधिं मे पातु ॥ चित्रकान्तिमृद्भ्रामरी पादादिमस्तकान्त मे पातु ॥ इति जरामृत्युहरी नन्दजादिन्यासश्चतुर्थः ॥४॥ पादादिनाभिपर्यन्तं ब्रह्मा मां पातु ॥ नाभेर्विशुद्धिपर्यन्तं जनार्दनो मां पातु ॥ विशुद्धेर्ब्रह्मरन्ध्रान्तं रुद्रो मां पातु ॥ हंसो मे पदद्वयं पातु ॥ वैनतेयः करद्वयं मे पातु ॥ वृषभश्चक्षुषी मे पातु ॥ गजाननः सर्वाङ्गं मे पातु ॥ आनन्दमयो हरिः परापरौ देहभागौ मे पातु ॥ इति सर्वकामदो ब्रह्मादिन्यासः पञ्चमः ॥ ५ ॥ अष्टादशभुजा लक्ष्मीर्मध्यभागं मे पातु ॥ अष्टभुजा महासरस्वती ऊर्ध्वभागं मे पातु॥

दशभुजा महाकाली अधोभागं मे पातु ॥ सिंहो हस्तद्वयं मे पातु ॥ परमहंसोऽक्षियुगं मे पातु ॥ महिषारूढो यमः पदद्वयं मे पातु ॥ महेशश्चण्डिकायुक्तः सर्वाङ्गं मे पातु ॥ इति महालक्ष्म्यादि-न्यासः सद्गतिप्रदः षष्ठः ॥ ६ ॥ ऐंनमो ब्रह्मरन्ध्रे ॥ ह्रींनमो दक्षिणनेत्रे ॥ क्लींनमो वामनेत्रे ॥ चांनमो दक्षिणकर्णे ॥ मुंनमो वामकर्णे ॥ डांनमो दक्षिणनासापुटे ॥ यैंनमो वामनासापुटे ॥ विंनमो मुखे ॥ खैंनमो गुह्ये ॥ इति मूलाक्षरन्यासो रोगक्षयकरः सप्तमः ॥७॥ खैंनमो गुह्ये ॥ विंनमो मुखे ॥ यैंनमो वामनासापुटे ॥ डांनमो दक्षिणनासापुटे ॥ मुंनमो वामकर्णे ॥ चांनमो दक्षिण-कर्णे ॥ क्लींनमो वामनेत्रे ॥ ह्रींनमो दक्षिणनेत्रे ॥ ऐंनमो ब्रह्म-

रन्ध्रे ॥ इति विलोमाक्षरन्यासः सर्वदुःखनाशकोऽष्टमः ॥ ८ ॥ मूलमुच्चार्य ॥ मस्तकाच्चरणान्तं चरणान्मस्तकान्तं अष्टवारं व्यापकं कुर्यात् ॥ स च यथा ॥ प्रथमं पुरतो मूलेन मस्तकाच्चरणावधिः ॥१॥ ततश्चरणान्मस्तकावधिः मूलोच्चारेण व्यापकम् ॥ २ ॥ एवं दक्षिणतः पश्चा[illegible]भागे चेति प्रतिदिग्भागेऽनुलोमविलोमतया द्विर्द्विरिति अष्टवार व्यापकं भवति ॥ इति देवताप्राप्तिकरो मूलव्यापको नवमः ॥९॥ मूलमुच्चार्य [illegible]याय नमः ॥ एवं प्रत्यङ्गं सर्वत्र मूलमुच्चार्य षडङ्गेषु न्यसेत् ॥ इति मूलषडङ्गन्यासस्त्रैलोक्यवशकरो दशमः ॥१०॥ खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा ॥ शङ्खिनी चापिनी बाणभुशुण्डीपरिघायुधा ॥१॥ सौम्या-

सौम्यतराशेषसौम्येभ्यस्त्वतिसुन्दरी ॥ परापराणां परमा त्वमेव परमेश्वरी ॥२॥ यच्च किञ्चित् क्वचिद्वस्तु सदसद्वाखिलात्मिके ॥ तस्य सर्वस्य या शक्तिः सा त्वं किं स्तूयसे मया ॥ ३ ॥ यया त्वया जगत्स्रष्टा जगत्पात्यत्ति यो जगत् ॥ सोऽपि निद्रावशं नीतः कस्त्वां स्तोतुमिहेश्वरः ॥४॥ विष्णुः शरीरग्रहणमहमीशान एव च ॥ कारितास्ते यतो तस्त्वां कः स्तोतुं शक्तिमान्भवेत् ॥५॥ आद्यं वाग्बीजं कृष्णतरं ध्यात्वा सर्वाङ्गे विन्यसामि ॥ इति सर्वाङ्गे न्यसेत् ॥ शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके ॥ घण्टास्वनेन नः पाहि चापज्यानिःस्वनेन च ॥ १ ॥ प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे ॥ भ्रामणेनात्मशूलस्य उत्तरस्यां

तथेश्वरि ॥२॥ सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते ॥ यानि चात्यन्तघोराणि तै रक्षास्माँस्तथा भुवम् ॥ ३ ॥ खड्गशूल-गदादीनि यानि चास्त्राणि तेऽम्बिके ॥ करपल्लवसङ्गीनि तैरस्मान् रक्ष सर्वतः ॥ ४ ॥ द्वितीयं मायाबीजं सूर्यसदृशं ध्यात्वा सर्वाङ्गे विन्यसेत् ॥ सर्वस्वरूपे सर्वेशे सर्वशक्ति समन्विते ॥ भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते ॥१॥ एतत्ते वदनं सौम्यं लोचन-त्रयभूषितम् ॥ पातु नः सर्वभूतेभ्यो कात्यायनि नमोऽस्तु ते॥२॥ ज्वालाकरालमत्युग्रमशेषासुरसूदनम् ॥ त्रिशूलं पातु नो भीतेर्भद्र-कालि नमोऽस्तु ते ॥३॥ हिनस्ति दैत्यतेजांसि स्वनेनापूर्य या जगत् ॥ सा घण्टा पातु नो देवि पापेभ्यो नः सुतानिव ॥ ४ ॥

असुरासृग्वसापङ्कचर्चितस्ते करोज्ज्वलः ॥ शुभाय खड्गो भवतु चण्डिके त्वां नता वयम् ॥ ५ ॥ तृतीयं कामबीजं स्फटिकाभं ध्यात्वा सर्वाङ्गे विन्यसामि ॥ इति सर्वाङ्गे विन्यसेत् ॥ इति सूक्तादिबीजत्रयन्यासः सर्वानिष्टहरः सर्वाभीष्टदः सर्वरक्षाकरश्चैकादशः ॥११॥ अथ मूलषडङ्गन्यासः ॥ ॐ ऐं अंगुष्ठाभ्यां नमः ॥ ॐ ह्रीं तर्जनीभ्यां नमः ॥ ॐ क्लीं मध्यमाभ्यां नमः ॥ ॐ चामुण्डायै अनामिकाभ्यां नमः ॥ ॐ विच्चे कनिष्ठिकाभ्यां नमः ॥ ॐ ऐंह्रींक्लींचामुण्डायै विच्चे करतलकरपृष्ठाभ्यां नमः ॥ एवं हृदयादि० ॥ ततोऽक्षरन्यासः ॥ ॐ ऐं नमः शिखायाम् ॥ ॐ ह्रीं नमः दक्षिणनेत्रे ॥ ॐ क्लीं नमः वामनेत्रे ॥ ॐ चां नमः

दक्षिणकर्णे । ॐ मुं नमः वामकर्णे ॥ ॐ डां नमः दक्षिणनासायाम् ॥ ॐ यैं नमः वामनासायाम् ॥ ॐ विं नमः मुखे ॥ ॐ च्चें नमः गुह्ये ॥ विन्यस्याष्टवारं मूलेन व्यापकं कुर्यात् ॥ अथाङ्गन्यासः ॥ ॐ ऐं प्राच्यै नमः ॥ ॐ ऐं आग्नेय्यै नमः ॥ ॐ ह्रीं दक्षिणायै नमः ॥ ॐ ह्रीं नैर्ऋत्यै नमः ॥ ॐ क्लीं प्रतीच्यै नमः ॥ ॐ क्लीं वायव्यै नमः ॥ ॐ चामुण्डायै उदीच्यै नमः ॥ ॐ विच्चे ईशान्यै नमः ॥ ॐ ऐंह्रींक्लीं चामुण्डायै विच्चे ऊर्ध्वायै नमः ॥ ॐ ऐंह्रींक्लीं चामुण्डायै विच्चे भूम्यै नमः ॥ अथ ध्यानम् ॥ खड्गं चक्रगदेषुचापपरिघाञ्छूलं भुशुण्डीं शिरः शङ्खं संदधतीं करैस्त्रि-नयनां सर्वाङ्गभूषावृताम् ॥ नीलाश्मद्युतिमास्यपाददशकां सेवे

महाकालिकां यामस्तौत्स्वपिते हरौ कमलजो हन्तुं मधुं कैटभम् ॥१॥ अक्षस्रक्परशुं गदेषुकुलिशं पद्मं धनुः कुण्डिकां दण्डं शक्तिमसिं च चर्म जलजं घण्टां सुराभाजनम् ॥ शूलं पाशसुदर्शने च दधतीं हस्तैः प्रवालप्रभां सेवे सैरिभमर्दिनीमिहमहालक्ष्मीं सरोजस्थिताम् ॥ २ ॥ घण्टाशूलहलानि शङ्खमुसले चक्रं धनुः सायकं हस्ताब्जैर्दधतीं घनान्तविलसच्छीतांशुतुल्यप्रभाम् ॥ गौरीदेहसमुद्भवां त्रिजगतामाधारभूतां महापूर्वामत्र सरस्वतीमनुभजे शुम्भादिदैत्यार्दिनीम् ॥३॥ मानसोपचारैः सम्पूज्य ॥ ॐ मां माले महामाये सर्वशक्तिस्वरूपिणि ॥ चतुर्वर्गस्त्वयि न्यस्तस्तस्मान् मे सिद्धिदा भव ॥१॥ इति मालां प्रार्थ्य ॥ ॐ सिद्धये नमः इति

मालां नत्वा जपेत् ॥ मन्त्रार्थस्तु "महासरस्वत्यादिरूपे चित्सदानन्दमये चण्डिके त्वां ब्रह्मविद्याप्राप्त्यर्थं वयं सर्वदा ध्यायामः"॥ इत्यर्थानुसन्धानपूर्वकं १०८ नवार्णमन्त्रं जप्त्वा षडङ्गन्यासं कृत्वा रात्रिसूक्तं जपेत् ॥ तद्वैदिकं पौराणिकं वा ॥ तत्रेदं वैदिकम् ॥ रात्रीति सूक्तस्य कुशिक ऋषिः ॥ रात्रिर्देवता ॥ गायत्रीच्छन्दः ॥ श्रीजगदम्बाप्रीत्यर्थे सप्तशतीपाठादौ जपे विनियोगः ॥ ॐ रात्री व्यख्यदायती पुरुत्रा देव्यक्षभिः ॥ विश्वा अधि श्रियोऽधित ॥ ओर्वप्रा अमर्त्या निवतो देव्युद्वतः ॥ ज्योतिषा बाधते तमः ॥ निरु स्वसारमस्कृतोषसं देव्यायती ॥ अपेदु हासते तमः ॥ सा नो

अद्य यस्या व्रयं नि ते यामन्नविक्ष्महि ॥ वृक्षे न वसतिंवयः ॥ निग्रामासो अविक्षत नि पद्वन्तो नि पक्षिणः ॥ निश्येनासश्चिदर्थिनः ॥ यावया वृक्यं वृकं यवयस्तेनमूर्म्ये ॥ अथा नः सुतरा भव ॥ उप मा पेपिशत्तमः कृष्णं व्यक्तमस्थित ॥ उष ऋणेव यातय ॥ उप ते गा इवाकरं वृणीष्व दुहितर्दिवः ॥ रात्रि स्तोमं न जिग्युषे ॥ इति ॥ अथ पौराणिकम् ॥ विश्वेश्वरीं जगद्धात्रीं स्थितिसंहारकारिणीम् ॥ निद्रां भगवतीं विष्णोरतुलां तेजसः प्रभुः ॥१॥ ब्रह्मोवाच ॥ त्वं स्वाहा त्वं स्वधा त्वं हि वषट्कारः स्वरात्मिका ॥ सुधा त्वमक्षरे नित्ये त्रिधामात्रात्मिका स्थिता ॥२॥ अर्द्धमात्रा

स्थिता नित्या यानुच्चार्या विशेषतः ॥ त्वमेव सन्ध्या सावित्री त्वं देवि जननी परा ॥३॥ त्वयैतद्धार्यते विश्वं त्वयैतत् सृज्यते जगत् ॥ त्वयैतत्पाल्यते देवि त्वमत्स्यन्ते च सर्वदा ॥४॥ विसृष्टौ सृष्टिरूपा त्वं स्थितिरूपा च पालने ॥ तथा संहृतिरूपान्ते जगतोऽस्य जगन्मये ॥५॥ महाविद्या महामाया महामेधा महास्मृतिः ॥ महामोहा च भवती महादेवी महेश्वरी ॥ ६ ॥ प्रकृतिस्त्वं च सर्वस्य गुणत्रयविभाविनी ॥ कालरात्रिर्महारात्रिर्मोहरात्रिश्च दारुणा ॥७॥ त्वं श्रीस्त्वमीश्वरी त्वं ह्रीस्त्वं बुद्धिर्बोधलक्षणा ॥ लज्जा पुष्टिस्तथा तुष्टिस्त्वं शान्तिः क्षान्तिरेव च ॥ ८ ॥ खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा ॥ शङ्खिनी चापिनी बाणभुशुण्डीपरिघायुधा

॥ ९:॥ सौम्या सौम्यतराशेषसौम्येभ्यस्त्वतिसुन्दरी ॥ परापराणां परमा त्वमेव परमेश्वरी ॥१०॥ यच्च किञ्चित्क्वचिद्वस्तु सदसद्वाऽखिलात्मिके ॥ तस्य सर्वस्य या शक्तिः सा त्वं किं स्तूयसे मया ॥११॥ यया त्वया जगत्स्रष्टा जगत्पात्यत्ति यो जगत् ॥ सोऽपि निद्रावशं नीतः कस्त्वां स्तोतुमिहेश्वरः ॥ १२ ॥ विष्णुः शरीरग्रहणमहमीशान एव च॥ कारितास्ते यतोऽतस्त्वां कः स्तोतुं शक्तिमान् भवेत् ॥ १३ ॥ सा त्वमित्थं प्रभावैः स्वैरुदारैर्देवि संस्तुता ॥ मोहयैतौ दुराधर्षावसुरौ मधुकैटभौ ॥१४॥ प्रबोधं च जगत्स्वामी नीयतामच्युतो लघु ॥ बोधश्च क्रियतामस्य हन्तुमेतौ महासुरौ ॥१५॥ इति रात्रिसूक्तं समाप्तम् ॥

अथ पल्लवयोजनासम्पुटीकरणपाठज्ञापकं यथा ॥ पल्लव प्रकारः सर्वमङ्गल० इति मन्त्रपल्लवे ॐ मार्कण्डेय उवाच सर्व-मङ्गल० इति प्रणवादिप्रतिसप्तशतीमन्त्रान्ते पल्लवमन्त्रं पठेदिति ॥ अथ योजनाप्रकारः ॥ ॐ सर्वमङ्गल० मार्कण्डेय उवाच ॥ इति सप्तशतीप्रतिमन्त्रादौ सप्रणवं योजनामन्त्रं पठेत् ॥ अथ सम्पुटी-करणप्रकारः ॥ ॐ शरणा० मार्कण्डेय उवाच शरणा० एवं सप्त-शतीमन्त्रादौ मन्त्रान्ते च सम्पुटमन्त्रं पठेत् ॥ अयं तु शान्तिक-पौष्टिक-वशीकरणादि शुभकर्मसु ॥ शत्रुविद्रावणोच्चाटनाद्युग्रकर्मसु यथा ॐ ह्रुँ फट् मार्कण्डेय उवाच फट् ह्रुँ ॐ इति सप्तशती मन्त्रादौ विद्रावणबीजानि पठित्वा तान्येवान्ते विलोमानि पठेदिति

ॐ श्रीगणेशाय नमः ॥ अस्य श्रीसप्तशतीस्तोत्रमालामन्त्रस्य ब्रह्मविष्णुरुद्रा ऋषयः गायत्र्युष्णिगनुष्टुप्छन्दांसि श्रीमहाकाली-महालक्ष्मीमहासरस्वत्यो देवताः नन्दाशाकम्भरीभीमाः शक्तयः रक्तदन्तिका दुर्गाभ्रामर्यो बीजानि अग्निवायुसूर्यास्तत्त्वानि ऋग्यजुः सामवेदा ध्यानानि मम सकलकामनासिद्धये श्रीमहाकालीमहा-लक्ष्मीमहासरस्वतीप्रीत्यर्थे जपे विनियोगः ॥ तत्रादौ न्यासः ॥ ॐ खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा ॥ शङ्खिनी चापिनी बाणभुशुण्डीपरिघायुधा ॥ अङ्गुष्ठाभ्यां नमः ॥ ॐ शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके ॥ घण्टास्वनेन नः पाहि चापज्यानिःस्वनेन च ॥ तर्जनीभ्यां नमः ॥ ॐ प्राच्यां

रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे ॥ भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरि ॥ मध्यमाभ्यां नमः ॥ ॐ सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते ॥ यानि चात्यन्तघोराणि तै रक्षास्माँस्तथा भुवम् ॥ अनामिकाभ्यां नमः ॥ खड्गशूलगदादीनि यानि चास्त्राणि तेम्बिके ॥ करपल्लवसङ्गीनि तैरस्मान्रक्ष सर्वतः ॥ कनिष्ठिकाभ्यां नमः ॥ ॐ सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते॥ भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते ॥ करतलकरपृष्ठाभ्यां नमः ॥ एवं हृदयादि० ॥ ॐ खड्गिनी शूलिनी घोरा० हृदयाय नमः ॥ ॐ शूलेन पाहि नो देवि० शिरसे स्वाहा ॥ ॐ प्राच्यां रक्ष प्रतीच्यां च० शिखायै वषट् ॥ ॐ सौम्यानि यानि रूपाणि०

कवचाय हुम् ॥ ॐ खड्गशूलगदादीनि० नेत्रत्रयाय वौषट् ॥ ॐ सर्वस्वरूपे सर्वेशे० अस्त्राय फट् ॥ अथ चण्डीपञ्चाक्षरमन्त्र-न्यासः ॥ ॐ हृीं हृदयाय नमः ॥ ॐ चं शिरसे स्वाहा ॥ ॐ डिं शिखायै वषट् ॥ ॐ कां कवचाय हुम् ॥ ॐ यैं नेत्रत्रयाय वौषट् ॥ ॐ हृीं चण्डिकायै अस्त्राय फट् ॥ अथ चक्रन्यासः ॥ ॐ शम्भु-तेजोज्वलज्वालामालिनि पावके हृां नन्दायै अंगुष्ठाभ्यां नमः॥ ॐ शम्भुतेजोज्वलज्वालामालिनि पावके हृीं रक्तदन्तिकायै तर्जनीभ्यां नमः ॥ ॐ शम्भुतेजोज्वलज्वालामालिनि पावके हृूँ शाकम्भर्यै मध्यमाभ्यां नमः ॥ ॐ शम्भुतेजोज्वलज्वालामालिनि पावके हृैं दुर्गायै अनामिकाभ्यां नमः ॥ ॐ शम्भुतेजोज्वलज्वालामालिनि